बसवभास्करोदयः

महाकाव्यम्

रचयिता
शिवकवि : डॉ॰ परड्डी मल्लिकार्जुनः ।

प्रकाशकः
श्री कोट्टूरेश्वर ग्रंथ प्रकाशनम्
कल्मठ : गंगावती-५८३२२७

श्रीचन्नबसवस्वामि ग्रन्थमाला-द्वितीयं कुसुमम् ।

बसवभास्करोदयः

(महाकाव्यम्)

– रचयिता –

शिवकविः डॉ. परड्डी मल्लिकार्जुनः

एम्. ए. पी. एचडी. साहित्यरत्नम्

प्राध्यापकः विभागाध्यक्षश्च

स्नातकोत्तरसंस्कृतविभागः

कर्नाटक विश्वविद्यालयः धारवाड - 580 003

प्रकाशकः

श्री कोट्टूरेश्वर ग्रन्थ प्रकाशनम्

कल्मठः, गङ्गावती - 583 227

अगस्त 1998

"Basavabhaskarodayah"— A Sanskrit Mahakavya
by Dr. Paraddi Mallikarjuna,
Professor and Chairman,
Department of Sanskrit,
Karnatak University Dharwad - 580 003
Published by Shri Kottureshvara Grantha
Prakashanam, Kalmatha, Gangavati - 583 227

© Author

First Edition : August 1998

Price : Rupees Sixty (60/-) only

Printer : K. E. Board's Printing Press,
Vidyaranya High School Compound,
Dharwad - 580 001

बसव भास्करोदयः
शिवकवि डॉ. परड्डी मल्लिकार्जुन विरचितं महाकाव्यम्।
श्री कोट्टूरेश ग्रन्थ प्रकाशनम्,
कल्मठ गंगावती द्वारा प्रकाशितम्।

सर्वेऽधिकारा : लेखकाधीनाः।

प्रथमं मुद्रणम् : अगस्त १९९८

मूल्यं : षष्टि (६०) रूप्यकाणि।

मुद्रकः— के. ई. बोर्ड प्रिंटिंग प्रेस्,
विद्यारण्य हैस्कूल कंपौंड, धारवाड

समर्पणम्

यस्योदारवचा हि काव्यरचनामग्नोऽभवं चोदितः
यस्मिन् जीवति गौरवान्महदिदं काव्यं मया पूरितम् ।
लिङ्गैक्ये सति हन्त जीर्णवयसा मुद्राङ्कनालंकृतं
तस्मै पण्डित नागभूषण ! गुरो ! काव्यं मुदा तेऽर्पितम् ॥

विषयानुक्रमणी

प्रस्तावना- प्रा. कृ. त. पाण्डुरङ्गि ।

काव्यप्रशंसा-डॉ. राजेंन्द्रमिश्रः ।

कवेरात्मनिवेदनम् :

महाकाव्यम्

प्रथमः सर्गः	1-9
द्वितीयः सर्गः	10-17
तृतीयः सर्गः	18-24
चतुर्थः सर्गः	25-35
पञ्चमः सर्गः	36-44
षष्टः सर्गः	45-50
सप्तमः सर्गः	51-56
अष्टमः सर्गः	57-66
नवमः सर्गः	67-72
दशमः सर्गः	73-78
एकादशः सर्गः	79-84
द्वादशः सर्गः	85-94
त्रयोदशः सर्गः	95-101
चतुर्दशः सर्गः	102-109
पञ्चदशः सर्गः	110-118
षोडशः सर्गः	119-124
पारिभाषिक पदकोशः	125-128
श्लोकानुक्रमणी	129-140
शुद्धिपत्रम्	141-142

प्रस्तावना

अस्मदन्तेवासिना शिवकविना श्री परड्डी मल्लिकार्जुनेन विरचितं 'बसवभास्करोदय' नामकं संस्कृतमहाकाव्यं विंशति-शतकीय संस्कृत साहित्य कृतिषु विशिष्टस्थानमर्हति ।

दक्षिणभारते विशेषतः कर्नाटके प्रचलितेषु मतधर्मेषु शैवागम-लाकुलीश-कालामुखभैरवदिविविधशैवसंप्रदायानामेकीकरणेन संघटितम्। सर्वेऽपि शिवभक्ताः समाना । जातिकुलसंप्रदायभेदेन शिवभक्तेषु निचोच्चभावकल्पनां न युक्ता। स्वस्वकार्यनिष्ठा एव कैलास सोपानम् । दासोहेन नानाजनशुश्रूषा जीवनसार्थक्यप्रदा इति उद्घोष्य वीरशैवधर्मेण सामाजिकसमानता साधिता। क्रियानिष्ठं च जीवनं प्रतिष्ठापितम् ।

अस्य वीरशैवस्य प्रवर्तकः श्री बसवेश्वरः इति सुप्रसिद्धमेव । अस्य महापुरुषस्य जीवनचरितमस्मिन् महाकाव्ये वर्णितम् ।

श्रीबसवेश्वरस्य बाल्यं, संगमगुरोः सकाशे विद्याभ्यासः, मातुलस्य बलदेवमन्त्रिण. दुहित्रा गंगाम्बिकया सह विवाहः, पुनः संगमक्षेत्रमागत्य विशेषतः ज्ञानार्जनं, कल्याणनगरीमागत्यामात्यपदवीनिर्वाहः अल्लम-प्रभोः समागमः, शून्यसिहासनारोहणं चन्नबसव-सिद्धराम-अक्कमहादेवी प्रभृतिशरणानां वृत्तान्ताः शिवानुभव मण्टपे धर्मरहस्यचर्चा, श्री बसवेश्वरस्य महिमातिशयः अवतारकार्यसमाप्तौ कूडलसंगमे लिंगैक्यमित्येते विषयाः अस्मिन् महाकाव्ये हृदयग्राहितया वर्णिताः ।

मतनवीकरणदीक्षितस्य चरित्रवर्णनात्मकेऽस्मिन् काव्ये वीरशैव-धर्मस्य प्रधानानि तत्त्वानि स्फुटतया निरूपितानि ।

अष्ठावरणसंयुक्ताः पंचाचारपरायणाः ।
षट्स्थलाचारसंपन्नाः एकोत्तरशतस्थलाः ।।
साधनाध्यात्मवित्ताढ्याः शिवाद्वैतसमाधयः ।
पंचाक्षरजपासक्तिनिर्धूतचित्तविभ्रमाः ।।
भस्मस्नानरताश्चापि त्रिपुंड्रिकांकितमस्तकाः ।। (ix 32–34)

इति शिवभक्तवर्णनव्याजेन प्रधानाः वीरशैवप्रमेया निरूपिताः ।

वीरशैवधर्मेण मानवानां नैतिकपुनरुत्थाने विशेषतः प्रयत्नः कृतः । कामक्रोधलोभपरित्यागाय वचनसाहित्ये बहुधा उपदेशः कृतः । परस्त्रीपरद्रव्यापहारः महान् दोष इति वारं वारं निरूपितम् । नानाजातिभाषावेषभूषाप्रदेशादिभेदेऽपि समग्रो मानवसमाजः एक कुटुम्बकमिति नीतिधर्मोऽपि अस्मिन् महाकाव्ये बलवदाग्रहेण निरूपितः ।

i) परस्त्रीरता ये सदा तर्जनीयाः
परद्रव्यरागाः सदा वर्जनीयाः । (viii 33)

ii) सतां लोकसौख्ये रतानां यतीनां
कुतस्तारतम्यं सुरम्ये समाजे ।
न ते जातिभेदं नवालिंगभेदं
वयोरूपभेदं नवा कर्तुकामाः ।। (viii 45–46)

iii) मातृवत्परदारेषु लोष्ठवत्परकाञ्चने ।
आत्मवत्सर्वभूतेषु पश्यन्तो गतविभ्रमाः ।। (ix–17)

एवमादीनि नीनिबोधकवचनानि अस्मिन् महाकाव्ये बहुत्र उपलभ्यन्ते ।

धर्मनीतिविषयकेऽस्मिन् महाकाव्ये काव्यगुणा अपि सम्यगायोजिताः । षोडशसर्गात्मकेऽस्मिन् महाकाव्ये बसन्ततिलकं, भुजङ्ग प्रयातं, विबुधप्रिया, मन्दाक्रान्ता, स्रग्विणी, उपेन्द्रवज्रा प्रभतिद्वादशछन्दांसि सरसतया काव्यभावनाप्रवाहशीतलानि मधुरशब्दनृत्यपद विक्षेपसुलभानि गानयोग्यानि आयोजितानि ।

उपमा – रूपक – उत्प्रेक्षादृष्टान्त – अर्थान्तरन्यासाद्यलंकाराः आयोजिताः ।

i) स्वक्षमाजितभूरमां शुचिशीलनिर्जितजानकीम् ।
स्वप्रभाजितरोहिणीं मृदुवाग्जितामरभारतीम् ।। (v-11)

ii) यथा कामधेनुः गवामग्रगण्या
यथा सिन्धुमध्ये प्रसिद्धा च गङ्गा ।
यथा रत्नमध्ये मणिः कौस्तुभाख्यः
तथा मन्त्रिमध्ये भवानग्रगण्यः ।।

एवं काव्यगुणसंपन्नेऽस्मिन् महाकाव्ये द्वितीयसर्गे भारतमातृभूमिः वर्णिता । कर्नाटकमाता च वर्णिता ।

एवं बहुविधगुणोयेतमिदं महाकाव्यं सहृदयानां धर्मपरायणानां च चेतः आवर्जयतीति विश्वसिमः । शिवकविरयं बसवभास्करोदयाख्यं नाटकमपि रचयतु इत्याशास्महे ।

कृ. त. पाण्डुरंगि
बेंगलूरु विश्वविद्यानिलयस्य
निवृत्त संस्कृत प्राध्यापकः ।

काव्यप्रशंसा

वृन्दारकभारतीदानीमपि जीवतितरां स्वस्थेमानं काव्यनाट्य कथाचम्पूप्रभृति प्रणयनैर्युगप्रवृत्तिबोधनपरैः प्रमाणयन्ती। मृताऽसाविति कौलीनरसिकाः कतिपयाङ्ग्लविद्वत्तृणपुरुषगताऽनुगतिका भारतीयाः पश्यन्तु निर्भरं यत्स्वातन्त्र्यप्राप्त्यनन्तरमेव पञ्चाशद्वर्षीये स्वल्पावधौ प्रायेण250 मितानि बहत्कलेवराणि महाकाव्यानि देववाण्यां प्रणीतानि। या खलु हिन्दी राष्ट्रभाषेति प्रख्याप्यते, कामधेनुरिव सर्वसम्भाव्य प्रयत्नैर्नितरां संसेव्यते साऽपि महाकाव्यत्रयमात्रेण प्रियप्रवास-कामायनी-साकेता-मिधानेनात्मगौरवं यथाकथञ्चिद्रक्षन्ती निर्मितिदुर्विधत्व-मुपगतेव संलक्ष्यते। परन्तु शासनोपेक्षां भृशं सहिष्णुः प्रभविष्णुतायाः परां कोटिमधिरूठा वेदपुराणशास्त्रकाव्यादिवाङ्मयरसायनमात्म सात्कुर्वाणा शतसहस्रर्षिमहर्षिप्राज्ञकविजनमनीषाविलसितविवर्धित-समृद्धिरियं देववाणी प्रतिकूलेऽप्यनेहसि स्वास्तित्वं महिमानं प्रथिमानं किञ्चात्माजरत्वममरत्वञ्च साधु साधयति।

निबन्धान्तरे मया निर्विशङ्कमुदितं यदर्वाचीनसंस्कृतकवितायाः स्वर्णकालोऽधुना प्रवर्तते। इतः प्राक् पुनर्जागरणकालः (1784-1885) स्थापनाकालश्च (1886-1947) व्यतीतौ। स्थापनाकाल एव गीतादिप्रणयनं प्रारब्धं, प्राक्तनकाव्यशास्त्रानुमतसिद्धान्तपरिपाटी मतिक्रम्याभिनवशिल्पेतिवृत्तानि महाकाव्यानि प्राणीयन्त, हिन्द्यादि भारतीय भाषासमगतीन्येकाङ्कीनि पुष्कलमात्रया विरचितानि। एवं हि स्थापनाकालोऽयमासीद् विविधनूतन साहित्यसंरचनानां प्रस्थान कालः। एतत्कालोत्पन्नाः प्रतिभापटिष्ठाः संस्कृतकवयो निश्चप्रचं सर्वतन्त्रस्वतन्त्रप्रवृत्तिमात्मनीनां निरङ्कुशताञ्च प्रदर्श्याभिनव

साहित्यनिर्मिते. सरणिं प्रशस्तामकुर्वन् । अन्यथा महाकाव्यनाटकादिषु देवनृपकोटिकनायकसमलङ्कृतेषु सत्सु क्वासीदवकाशोऽधुनातननृपेतरनायकचरिताश्रितानां महाकाव्यादीनाम् ? अनेनैतदुक्तं भवति यत्संस्कृतकाव्यधारा मन्दाकिनीव सन्ततप्रवाहमयी गतिशीला च । प्राक्तनकाव्यशास्त्रीयनियमानुबन्धपोषणपराऽप्यसौ युगप्रवृत्तिं युगबोधं वा नोपेक्षते। अन्या भारतीयभाषा इव साऽपि साम्प्रतिकसमाजप्रवृत्तीः प्रतिपाद्यीकरोति, तद्दर्पणभूता च सन्तिष्ठते। एवं हि अर्वाचीनसंस्कृतकविता कविजनानामुदारदृष्टेः प्रक्रान्तप्रतिबद्धतायाः गतिशीलरचनाधर्मितायाश्च मानदण्डं समुपस्थापयति ।

भवतु । अनेनात्मवाचिकेन विशेषं कञ्चित्प्रस्तोतुकामोऽहं परिलक्ष्ये । अस्मद्वयस्यरत्नं कार्णाटसंस्कृतसाहितीगौरवभूतः शिवकविरित्युपाह्वो डॉ. मल्लिकार्जुन परड्डि महोदयः समुपायनीकरोति बसवभास्करोदयाभिधं महाकाव्यम् । महाकाव्येऽस्मिन् कविना बसवकुमारो नायकीकृतो य आसीन्मनोरथतनयः कर्णाटरम्यविषयोत्पन्नानां यमिवरेण्यानां शैवकुलाग्रगण्यानां विप्रवंशावतंसानां श्रीमादिराजानाम् । मादाम्बाऽसीद् बसवेश्वरस्य जन्मदात्री। तौ दम्पती महताऽभिनिवेशेन परया श्रद्धया च नन्दिव्रतमनुष्ठाय पार्वतीपरमेश्वरानुकम्पया साक्षान्नन्दीश्वरमेव पुत्रतामुपगतमवापतुः। दैवीकलासंवलितोऽयमेव बसवकुमारोऽष्टवर्षीयो यज्ञोपवीतसंस्कारावसरे कर्मकाण्डवैयर्थ्यं साधयन् सर्वोदयप्रवणं शैवागमोक्तमतं यज्ञादिहिंसनबिरहितं प्रीततमं प्रकाशितवान् । स खलु दृढमवादीदार्जवशीलं पितरं प्रति–

सर्वोदयं प्रति सदाहितसर्वयत्नं शैवागमोक्तमतमद्भुतदिव्यरत्नम् ।
त्यक्त्वा तदद्य भुवने भवतापहारि न स्वीकरोमि मतमत्र तवाऽपकारि ।।
धूर्तोपकारचतुरं कृतभेदभावं यज्ञादिहिंसनपरं सुधियाञ्च हेयम् ।
मुग्धापकाररसिकं विविधोपचारं त्वद्दर्शनं तु तमसावृततत्त्वसारम् ।।

– बसवभास्करोदयः 4 / 42, 44,

एवं हि वैदिककर्मकाण्डं प्रत्यनास्थां प्रकाश्य बसवकुमार औदार्य-जीवातुभूतं भेदभावरहितं प्राणिमात्राभ्युदयपर्यवसितम् आदिशैवं विमल दर्शनं विशदीचकार । एतद्दर्शनदृशा तु मानवदिव्यदेह एव देवालयः । शिवस्तनुगतो विराजते आत्मस्वरूपः । स एव करुणावरुणालयः पशुपतिः शरणागतमानवानां पाशं भिनत्ति सायुज्यदाननिसर्गतया । आत्मदृष्टि प्रथयन् कुमारो बसवोऽवादीत्–

श्रीशङ्करो मम पिताऽतुलशक्तियुक्तः
माता च लोकजननी हिमवत्तनूजा ।
मित्राणि बोधविभवाः शिवभक्तिपूताः
सर्वं विशालभुवनं भवनं मदीयम् ।। तदेव, 4 / 46

एवमादिव्याख्यानानन्तरमेव नन्दीश्वरावतारभूतो बसवकुमारः नागाम्बिकाख्यया भगिन्याऽनुगतः शिवयोगमध्येतुं सङ्गमगुरोः श्री जातवेदमुनिपुङ्गवस्याश्रमं प्रपेदे । सन्त्यक्तकर्मकाण्डमत्नीमस वैदिकधर्मरीतिः उदारचारुशिवार्चनरतोऽयमेव बसवकुमारः पश्चात् स्वमातुलस्य नृपसाचिव्यरतस्य बलदेवाभिधस्य तनयां मूर्तिमतीं शम्भु-भक्तिमिव गङ्गाम्बिकां परिणीय स्वगुरुनिदेशाद् वीरशैवमतं लोके प्रचारयितुं बद्धपरिकरो जातः । यद् वीरशैवमतं प्राक् शिवागमादि सद्ग्रंथविशदीकृतमपि कालत्नीत्नाखिलीभूतं तिष्ठति स्म तदेव बसव-प्रयत्नैः पुनर्नवतां दधत्परं प्रथिमानं दधौ । कथमिति चेत् ?

भुवनं भवनं मत्वा शिवभक्तान् स्वबान्धवान् ।
उमेशौ पितरौ धन्यो वीरशैवकुलोद्भवः ॥

तदयं संक्षेपः प्रकरणोपात्तमहाकाव्येतिवृत्तस्य । सम्प्रति समीक्षा दृष्ट्या किञ्चिदुच्यते । काव्यमारिचयिविषुः कविर्निश्चप्रचं किमपि विशिष्टमुद्देश्यमाधत्ते । क्वचिदर्थः, क्वचित्कामः, क्वचिद्धर्मः क्वचिन् मोक्षो वा भवति काव्यप्रणयनोद्देश्यम् । परन्तु साम्प्रतिक-महाकाव्येषु सन्दृश्यते किञ्चिदपरमेव वैलक्षण्यम् । याभिस्समस्याभि-स्समाजोऽधुना सम्पीड्यतेऽ हर्निशं तन्निराकरणार्थमेव महाकाव्यानि प्रणीयमानानि परिलक्ष्यन्ते । तादृश एव कश्चिन्नायकोऽपि कविनाऽन्विष्यते । यथा खलु लोकरावणरावणस्य वधाकाङ्क्षयाऽऽदिकविर्वाल्मीकिः 'कोन्वस्मिन् साम्प्रतं लोक' इत्येवमादि देवर्षिं नारदं परिपृच्छन् स्वकाव्यकथोचितं नायकं मार्गयामास तथैव साम्प्रतिकोऽपि कविः प्रयतते । क्वचित्पुरातना एव । तथापि 'वाणी पुरातनकविनिबद्धार्थसंस्पर्शवत्यपि नवत्वमायातीति' ध्वनिकारप्रामाण्येन तत्रापि प्रतिपदनावीन्यं परिलक्ष्यते एव ।

वस्तुतः प्रतिभासमुल्लसितस्य कवेः काव्येतिवृत्तन्यौन्यं न भवति । योऽ प्रतिभस्तस्य तु सर्वत्रापि वस्त्वभावः । श्रीमदानन्दवर्धनाचार्योऽपि सर्वथैवम्मानी– 'न काव्यार्थविरामोऽस्ति यदि स्यात्प्रतिभागुणः' । ध्वन्या: 4/6.

बसवभास्करोदयकारी मल्लिकार्जुनोऽपि विलक्षणकाव्यनायकं प्रस्तौति यो वैदिककर्मकाण्डवशंवदे भूसुराऽन्वये लब्धजनिरपि वैदिकीं यज्ञहिंसां हिनस्ति, मिथ्यावर्णजात्यभिमानं, मानवकल्पितां प्रवराऽप्रवरभावनां, स्पृश्याऽस्पृश्यभेददृष्टिञ्च न कथमपि समर्थयते । एवं-

विधनायक एवाऽद्यतनभारतराष्ट्रेऽपेक्ष्यते। यतो हि राष्ट्रमिदं सम्प्रति एतादृशैरेव दुर्विधानदुर्विषैर्मूच्छितं तिष्ठति।

एतद् दुर्विधानं दर्शं दर्शं कविहृदयं तातप्यते। पदे-पदे प्रभवत्य-समञ्जसताऽस्माकं समाजे। क्वचिज्जात्यभिमानिनो मनुजा मनु-जान्तराणि सन्तापयन्ति। केचित्खण्डितवृत्ताः स्वयमेव धर्माचरण-विरहिता वर्तन्ते परन्तु दक्षिणोत्कोचं दत्वा, शिवार्चनं ब्राह्मणैः कारयित्वाऽऽत्मनोऽलीकधर्मनिष्ठां प्रदर्शयन्ति। समाजेऽस्माकं कियद-धरोत्तरत्वं सन्दृश्यते! अक्षम्यदोषकलङ्कितोऽपि जनो वर्णोत्तमस्सन् धनैश्वर्यबलेन सर्वत्र समाद्रियते परन्तु सर्वगुणसम्पन्नोऽपि हीनवर्णतयाऽ परः क्षीरमक्षीव बहिर्निष्कास्यते। किमिदम्? मूषिकादिक्षुद्रजन्तु-भिर्दूषितोऽप्यकिञ्चित्करः शिवविग्रहो दर्शनार्थमागतं शूद्रं देवालयं प्रवेष्टुं नाऽनुमन्यते! तत् किं मानवो देवालयप्रविष्टमूषिकपिपीलक गन्धमूषिकादिभ्योऽपि हीनतरः? किं सत्यमेवाऽसीमशक्तिश्शिवो देवालये बन्दीकर्तुं शक्यते? भारतीसमाजे संव्याप्ता इमा एव कुरीतयः कविहृदयं प्रकामं पीडयन्ति। इयमेव घनीभूता पीडा कविं सम्प्रेरयति बसवभास्करोदयमहाकाव्यस्य प्रणयनार्थम्।

महाकाव्यस्य प्रथमसर्ग एव कविरुपन्यस्यति अधुनातनभारतीय-समाजस्य दुर्दशामिमाम्—

कार्यस्वभावरुचिभिः रचिताऽपि वर्णरीतिः क्रमेण कलुषीकृतजातिरूपा।
यस्या बलेन मनुजो मनुजान्तरं तं सन्तापयन् भवति मानववर्गशापः॥
कार्यप्रवृत्तमनुजो धनिनां समाजे चारित्र्यवानपि महानपि दैन्यपूर्णः।
कार्यं निजं परकरैरपि कारयंश्च दुर्वृत्तरक्तहृदयः सुधियां सुमान्यः॥
देवालये विविधभूषणराजिते च पूजारतैरनुदिनं परिरक्षिते च।
बन्दीकृतो भवति शम्भुरसीमशक्तिः धूर्तस्यसंग्रहमतेर्विविधैव युक्तिः॥

ऐश्वर्यदोऽपि सकलेष्टगणप्रदोऽपि सालंकृतिर्विविधवेषधरो विचित्रः ।
शम्भुर्भवोऽपि विभवं ह्यशिवाञ्छतीति सर्वं हि वञ्चनधियामुपजाप
एतत् ।।

—बसवभास्करोदयः, प्रथमसर्गः ।

अनेन वाचिकेन बसवभास्करोदयमहाकाव्यस्य रचनोद्देश्यं सर्वथा स्फारीभवति । वस्तुतः काव्यमिदं व्यक्तिस्वातन्त्र्यस्य, सर्वोदयस्य, सद्गुणाश्रितसमाजसंरचनस्य, सौहार्दबन्धुत्वानुस्यूत सर्वजनसाम्यस्य, वैषम्यविरहितमानवतायाः, गुणानुरोधस्य च संस्थापनं कामयते । एतत्सर्वं लक्ष्यजातं स्वमनोऽभीष्टं कविः सम्पूरयति बसवेश्वरं नायकीकृत्य । बसवेश्वरचरितैर्बोधिसत्त्वोपमैर्यस्य समाजस्य परिचयोऽवाप्यते तस्मिन्न वर्तन्ते मानवकल्पितानि शास्त्रादेशभूतानि मृषा बन्धनानि । तस्मिन्न वर्तते स्पृश्याऽस्पृश्यभावना । तस्मिन्न वर्तते जात्याश्रिता निम्नोन्नतभावना । तस्मिन् समाजे प्रवहति ममताकरुणासहिष्णुतावत्सलतासमदृष्टीनां काचिन्निष्प्रत्यवाया सुरसिन्धुधारा ।

एतादृशः समाजः केवलं वीरशैवसम्प्रदायलक्ष्यभूत इतिकृत्वा शिवयोगरहदृश्यपाङ्गतस्सर्वोदयदृष्टिः कविः बसवेश्वरचरिताश्रयि सत्काव्यं निर्माय साम्प्रतिकभारतीयसमाजं समुपकुरुते । 'कविः करोति काव्यानि स्वादं जानन्ति पण्डिताः' इति यतुक्तं पूर्वसूरिभिस्तत्सत्यमेव । अस्य काव्यस्यापि रचनासार्थक्यं सहृदयाऽनुभवानुकूलमेव । तथापि निश्शङ्कमेतद्वक्तुमुत्सहे यत्मल्लिकार्जुनपरड्डिमहोदयो यथा सुकुमार सरणिमवलम्ब्य काव्यमाध्यमेन भारतीयसमाजकुरीतीः दूरीकर्तुं प्रयतते स खलु श्रेयस्करः पन्थाः । नायमभ्युपायो राजनीतिप्रवर्तितताऽभ्युपाय इव कल्मषान्तरं समुत्पादयति । जातिप्रथां व्यक्त्यवमानकरीं निराकर्तुं

यदि विवेकान्धा राजनीतिर्जनजातिरिति– विविधा नवनवा जाती: संसृजति तर्हि जातिप्रथा गमिष्यति, स्थिरीभविष्यति वा ? जातिप्रथाया अक्षुण्णाया नामान्तरकरणमात्रेण स्वरूपान्तरकरणमात्रेण वा को लाभ: ?

एवं सति 'रामादिवद् वर्तितव्यं न रावणादिवदिति' वाग्देवतावतारमम्मटाचार्यदृशा बसवेश्वरचरितं निदर्शनीकृत्य भारतीयसमाजदुर्व्यवस्थाऽपसारणप्रयासो मल्लिकार्जुनस्य प्रीततम: प्रतिभाति। यतो हि यादृशं समाजमाकाङ्क्षति कविस्तत्स्थापने प्राभवद् बसवेश्वर: प्राक्तनेऽनेहसि किञ्चाद्यापि तच्चरितानुसरणेन तादृश एव समाजो भूयस्त्वेन संस्थापयितुं शक्यते।

महाकाव्यनायको बसवप्रभु: कल्याण पट्टणेश्वरस्य बिज्जलभूपते: प्रधानामात्ये बलदेवाख्ये दिवङ्गते सति नृपतिनिवेदनं स्वीकृत्य तत्पदमलङ्चकार। वीरशैवमतानुयायिन: शम्भुभक्तिधुरन्धरस्य तस्य प्रधानामात्यपदाङ्गीकारेण न केवलं पट्टणेश्वरो बिज्जल एव, प्रत्युत सर्वेऽपि पृथग्धर्मदर्शनरता मानवा: परं प्रसादभावमुपजग्मु:। प्रधानामात्ये सति बसवेश्वरे दुर्जनाचरितं भयमपगतम्। सज्जनानां नासीदिदानीं क्षतिर्नतिर्वा। दुर्बलानां तिरस्कारवार्ताऽपि नाऽश्रूयत। एवं गुणविशिष्टोऽसौ बसवप्रभु: स्वदिव्यतेजसा प्रलोभ्य बिज्जलभूपं तत्साम्राज्ये वीरशैवमतानुगतं सौराज्यं स्थापयामास।

महाकाव्यस्य शिवधर्म प्रबोधनसंज्ञे नवमेऽथ च चन्नबसवोदयाख्ये दशमे सर्गे कविना वीरशैवमतस्य विस्तृतं प्राञ्जलं च स्वरूपमुपन्यस्तम्। अनयो: सर्गयो: परिशीलनेन वीरशैवसम्प्रदायस्यानुष्ठानिकं व्यावहारिकं च संविधानकं विशदीभवति। वीरशैवमतस्य दार्शनिकपक्षोऽप्यतीव

गूढः प्रतिभाति । जीवात्मपरमात्मनोः संयोगोऽत्र शिवयोगः समुच्यते । लिङ्गदीक्षापरिक्षीणं मलत्रयमेवात्र जीवनोपलब्धिः । मलत्रयञ्चापि तत् आणवमलं, कार्मिकमलं, मायामलम् । यः समस्तजीवेषु सदाशिवं समीक्षते, आत्मवत् परमपि विचिन्तयति, परस्त्रियं मातृवन्मन्यते, धनादिकं लोष्टवत्पश्यति, अनाप्तकल्मषस्स एव वीरशैवमतानुगतः । किञ्च,

नेता श्रीबसवेश्वरोऽत्र मतिमान्यो वीरशैवव्रती
गङ्गाम्बाऽनुगतोऽथ चन्नबसवोपाध्यायतागर्वितः ।
धर्माख्यः पुरुषार्थ एव रचनालक्ष्य रसोऽङ्गी पुन-
श्शान्तस्तद् विरचय्य कीर्तिमतुलां धत्ते परङ्गीकविः ॥

पुष्कलमात्रेऽपि साम्प्रतिकमहाकाव्यनिर्माणे सर्वथा निर्दोषरचना विरलैव । समग्रमपि बहुदायुष्यं व्यतीत्य, मानसम्मानपुरस्कारादीनि च समवाप्य प्रायेणाऽशुद्धं लिखन्तो विपश्चितो मयाऽक्षिलक्ष्यीक्रियन्ते । कस्तानधुना पाठयिष्यति ? अनेनैव मौढ्यबलेन तैः प्रसह्य प्रशासितं संस्कृतजगच्चिरकालं यावत् । जितं तेषां जन्मान्तरसौभाग्येन ! तत्परम्पराऽनुवर्तिनोऽधुनापि शीर्षस्था एव वर्तन्ते ।

परन्तु महत्प्रमोदस्यायं विषयो यद्बसवभास्करोदयकारः शिवकविर्मल्लिकार्जुनो वागधिष्ठात्र्या नैष्ठिकसमर्चकस्तद्वशंवदश्च । पारङ्गतोऽसौ निर्दोषभाषाप्रयोगे मनोनुकूलवृत्तचयनेच । धर्मदर्शन-रहस्यसंवलितमितिवृत्तं गूढातिगूढं वरीत्वाऽपि यथा श्लक्ष्णया कोमल कान्तसुबोधपदावल्याऽर्थगाम्भीर्यमहितयाऽसौ बसवेश्वरचरीतं वैशद्य-मुपनयति तेन तत्कवित्वं प्रति श्रद्दधाति मन्मानसम् । शिवाद्वैत परिज्ञानाय महाकाव्यमिदं वाङ्मयगुरुकल्पमिति वक्कुमुत्सहेऽहम् ।

यदि विवेकान्धा राजनीतिर्जनजातिरिति– विविधा नवनवाजाती: संसृजति तर्हि जातिप्रथा गमिष्यति, स्थिरीभविष्यति वा ? जाति-प्रथाया अक्षुण्णाया नामान्तरकरणमात्रेण स्वरूपान्तरकरणमात्रेण वा को लाभः ?

एवं सति 'रामादिवद् वर्तितव्यं न रावणादिवदिति' वाग्देवता-वतारमम्मटाचार्यदृशा बसवेश्वरचरितं निदर्शनीकृत्य भारतीयसमाज-दुर्व्यवस्थाऽपसारणप्रयासो मल्लिकार्जुनस्य प्रीततमः प्रतिभाति। यतो हि यादृशं समाजमाकाङ्क्षति कविस्तत्स्थापने प्राभवद् बसवेश्वर: प्राक्तनेऽनेहसि किञ्चाद्यापि तच्चरितानुसरणेन तादृश एव समाजो भूयस्त्वेन संस्थापयितुं शक्यते ।

महाकाव्यनायको बसवप्रभुः कल्याण पट्टणेश्वरस्य बिज्जलभूपते: प्रधानामात्ये बलदेवाख्ये दिवङ्गते सति नृपतिनिवेदनं स्वीकृत्य तत्पदमलञ्चकार । वीरशैवमतानुयायिनः शम्भुभक्तिधुरन्धरस्य तस्य प्रधानामात्यपदाङ्गीकारेण न केवलं पट्टणेश्वरो बिज्जल एव, प्रत्युत सर्वेऽपि पृथग्धर्मदर्शनरता मानवाः परं प्रसादभावमुपजग्मुः । प्रधाना-मात्ये सति बसवेश्वरे दुर्जनाचरितं भयमपगतम् । सज्जनानां नासीदि-दानीं क्षतिर्नतिर्वा । दुर्बलानां तिरस्कारवार्ताऽपि नाऽश्रूयत । एवं गुणविशिष्टोऽसौ बसवप्रभुः स्वदिव्यतेजसा प्रलोभ्य बिज्जलभूपं तत्सा-म्राज्ये वीरशैवमतानुगतं सौराज्यं स्थापयामास ।

महाकाव्यस्य शिवधर्म प्रबोधनसंज्ञे नवमेऽथ च चन्नबसवोदयाख्ये दशमे सर्गे कविना वीरशैवमतस्य विस्तृतं प्राञ्जलं च स्वरूपमुपन्यस्तम्। अनयोः सर्गयोः परिशीलनेन वीरशैवसम्प्रदायस्यानुष्ठानिकं व्यावहारिकं च संविधानकं विशदीभवति । वीरशैवमतस्य दार्शनिकपक्षोऽप्यतीव

गूढः प्रतिभाति । जीवात्मपरमात्मनोः संयोगोऽत्र शिवयोगः समुच्यते । लिङ्गदीक्षापरिक्षीणं मलत्रयमेवात्र जीवनोपलब्धिः । मलत्रयञ्चापि तत् आणवमलं, कार्मिकमलं, मायामलम् । यः समस्तजीवेषु सदाशिवं समीक्षते, आत्मवत् परमपि विचिन्तयति, परस्त्रियं मातृवन्मन्यते, धनादिकं लोष्टवत्पश्यति, अनाप्तकलमषस्स एव वीरशैवमतानुगतः । किञ्च,

नेता श्रीबसवेश्वरोऽत्र मतिमान्यो वीरशैवव्रती
गङ्गाम्बाऽनुगतोऽथ चन्नबसवोपाध्यायतागर्वितः ।
धर्माख्यः पुरुषार्थ एव रचनालक्ष्य रसोऽङ्गी पुन-
श्शान्तस्तद् विरचय्य कीर्तिमतुलां धत्ते परङ्डीकविः ॥

पुष्कलमात्रेऽपि साम्प्रतिकमहाकाव्यनिर्माणे सर्वथा निर्दोषरचना विरलैव । समग्रमपि वहदायुष्यं व्यतीत्य, मानसम्मानपुरस्कारादीनि च समवाप्य प्रायेणाऽशुद्धं लिखन्तो विपश्चितो मयाऽक्षिलक्ष्यीक्रियन्ते । कस्तानधुना पाठयिष्यति ? अनेनैव मौढ्यबलेन तैः प्रसह्य प्रशासितं संस्कृतजगच्चिरकालं यावत् । जितं तेषां जन्मान्तरसौभाग्येन ! तत्परम्पराऽनुवर्तिनोऽधुनापि शीर्षस्था एव वर्तन्ते ।

परन्तु महत्प्रमोदस्यायं विषयो यद्बसवभास्करोदयकारः शिवकविर्मल्लिकार्जुनो वागधिष्ठात्र्या नैष्ठिकसमर्चकस्तद्वशंवदश्च । पारङ्गतोऽसौ निर्दोषभाषाप्रयोगे मनोनुकूलवृत्तचयनेच । धर्मदर्शन-रहस्यसंवलितमितिवृत्तं गूढातिगूढं वरीत्वाऽपि यथा श्लक्ष्णया कोमल कान्तसुबोधपदावल्याऽर्थगाम्भीर्यमहितयाऽसौ बसवेश्वरचरीतं वैशद्य-मुपनयति तेन तत्कवित्वं प्रति श्रद्दधाति मन्मानसम् । शिवाद्वैत परिज्ञानाय महाकाव्यमिदं वाङ्मयगुरुकल्पमिति वक्कुमुत्सहेऽहम् ।

महाकाव्येऽस्मिन् कविः स्वप्रतिभापरिपाकं प्रदर्शयति सहजभावेनैव । विबुधप्रियावृत्तोपनिबद्धं सिद्धिरामकृतं मल्लिकार्जुनस्तवनं द्वादशसर्गस्थं शिवकवेर्मल्लिकार्जुनस्य छन्दः प्रयोगनैपुण्यं सम्यक् प्रमाणयति । एवमेव काव्ये स्रग्विणी-शार्दूलविक्रीडित-वसन्त तिलकोपजात्यनुष्टुप्चामर-भुजङ्गप्रयात-द्रुतविलम्बितादिवृत्तानां कथाप्रवाहानुकूलप्रयोगः कविना विहितः । तत्सर्वमेव बृहत्समीक्षाया विषय इतिकृत्वा मयाऽत्र परिहीयते ।

सारस्वतोऽयमध्यवसायः सर्वथाऽभिनन्द्यो मल्लिकार्जुनस्य । विश्वसिमि यदर्वाचीन महाकाव्यपरम्परायां काव्यमिदं स्वगौरवोचितं स्थानं लप्स्यते, सहृदयानां कवित्वगुणपक्षधराणां साधुवादं निष्पक्षाऽनुशंसाञ्चाप्यूरीकरिष्यति ।

कर्ता शिवकविर्यस्य नेता चापि शिवानुगः ।
शिवाद्वैतं च यद्वृत्तं सत्काव्यं तन्महीयताम् ।।

१४ अगस्त १९९८

सप्रणयमभिव्यनक्ति
अभिराजराजेन्द्रः
शिमला विश्वविद्यालमीयः

कवेरात्मनिवेदनम्

वर्णादिदौर्जन्यसुताडितानां दुर्भाग्यदारिद्र्यसुपीडितानाम् ।
मूर्तं प्रबोधं सुविचारपूर्णं वन्दे सदाहं बसवं प्रसन्नम् ।।

द्वादशशतके कर्नाटकराज्ये विचाराचारक्रान्तिद्वारा विश्वबन्धुता स्त्रीस्वतन्त्रता – समानतादिविशिष्टगुणोपेतसर्वोदयंकारणीभूतवीरशैव मतपुनरुत्थानदृढदीक्षितस्य बसवेश्वरस्य जीवनचरितमुद्दिश्य कृतमिदं षोडशसर्गात्मकं महाकाव्यं सारस्वतलोकसपर्यासमर्थमिति मनोमि। एतद्ग्रन्थरचनाप्रेरणाकारणीभूतानां विदुषां सहृदयानामुपकारं वारं वारं स्मरामि ।

प्रथमतः प्राध्यापक कृ. त. पाण्डुरंगि महोदयैर्मदीयगुरुवरेण्यैरहं दृढमुपकृतोऽस्मि यै. प्रस्तावनाव्याजेनाशीर्वचानुगृहीतः। केशवानन्दयोग संस्थान (दिल्ली) निर्देशकाय डा. ब्रह्ममिश्र अवस्थी महोदयाय कार्तज्ञ्यं समर्पयामि येन लब्धकेन्द्रसाहित्याकादम्यनुवादपुरस्कारस्य सटीक कबीरदासशतकस्य विमर्शावसरे 'कविरयं महाकवेरभिख्यया राराजता मिति शुभाशंसा', इति मदुत्साहवर्धनं कृतम् ! तथैव भूतपूर्व लोकसभा सदस्यस्य डा. विश्वनारायण शास्त्रिण उपकारं स्मरामि, येन 'तस्य यशांसि प्रसान्तु सर्वत्र पुन पुनरिति' मत्काव्यरचनासक्तिः वर्धिता ।

अभिराजाय डॉ. राजेन्द्रमिश्राय मत्परममित्राय स्वयं महाकवये कृतज्ञतामर्पयामि, येन न केवलं स्वीयमृगाङ्कदूते डॉ. के. कृष्णमूर्तिना मदाचार्येण साकं बालिद्वीपस्थेनापि मत्स्मरणं कृतम्–

ज्योत्स्नामूर्ते ! नय मम नतिं कृष्णमूर्ति बुधेन्द्रम् !
मच्छूद्धेयं सुकविसुहृदं चापि सौम्यं परड्डिम् ।।

किन्तु समग्रमिदं महाकाव्यं पठित्वा गुणग्राहिणा तेन सहृदयतया काव्यप्रशंसात्मकविमर्शेण मदुत्साहो द्विगुणीकृतः ।

केन्द्रसाहित्याकादम्यनुवादलाभंप्रसंगे मां सत्कृत्य प्रोत्साहवर्धनं कृतवते कर्णाटकविश्वविद्यालयस्य भूतपूर्वकुलपतये, अखिल भारतीय तान्त्रिकशिक्षासंस्थाननिर्देशकाय च डाँ. एस्. रामेगौड महोदयाय, विद्यापक्षपातिनेऽस्मद्विश्वविद्यालयकुलपतये डाँ. ए. एम्. पठान महोदयाय च हार्दीं कृतज्ञतां समर्पयामि ।

स्वीय श्री कोट्टूरेश्वरग्रन्थप्रकाशनद्वारा कृतेरस्याः प्रकाशनं कृतवद्भिः गंगावतीस्थ कल्मठाध्यक्षैः श्री म. नि. प्र. कोट्टूरेश्वर महास्वामिभिर्नितरामुपकृतोऽस्मि । अन्ततः एतद्ग्रन्थमुद्रणं सुचारुरीत्य । कृतवते के. ई. बोर्ड प्रेस्, कार्मिकगणाय कृतज्ञतामर्पयामि ।

गुणग्राहितया त्यक्तमत्सरैः विमलाशयैः ।
विश्वबन्धुचरित्राख्यहारो स्वीक्रियतां बुधैः ।।

प्रथमः सर्गः

(वसन्ततिलकवृत्तम्)

वन्दे प्रसन्नवदनं गिरिजार्धभागं
लोकैकनाथमसमानसमस्तयोगम् ।
चर्माम्बरं त्रिभुवनद्रविणैकमूलं
शम्भुं जगद्गुरुवरं शरणानुकूलम् ॥ १ ॥

वन्दे जगत्त्रयशरण्यगिरीन्द्रकन्या-
मर्धाङ्गिनीं पुरहरस्य सुपुत्रमान्याम् ।
शक्त्या समस्तभुवनाद्भुतसृष्टिदक्षां
भक्त्या तु सज्जनविमुक्तिविधानपक्षाम् ॥ २ ॥

वन्देऽथणीपुरशिवं मुरुघेन्द्रनाम-
योगीन्द्रवन्द्यचरणं मरणान्तकन्तम् ।
यस्यासमानकृपया मुरुघामठेऽस्मिन्
मृत्युञ्जयः सुरतरुश्चरपुंगवोऽयम् ॥ ३ ॥

मृत्युञ्जयातुलकृपाबलवान् महान्त-
स्वामीति लोकविदितो विरलो महात्मा ।
चारित्र्यशुद्धितपसाजितभक्तलोको
लोकोपकारनिपुणोऽवतु भक्तिनम्रान् ॥ ४ ॥

श्रीकालिदासममरं कविताप्रपञ्चे
शाकुन्तलादिभुवनत्रयकीर्तिपात्रम् ॥
दास्यं वहन्त्यनुदिनं कवयो यदीयं
वन्दे सुकाव्यरचनाहितचित्तवृत्तिः ॥ ५ ॥

वाल्मीकिमुख्यकृतिसुप्रथिता पृथिव्यां
दिव्या हिमालयकिरीटधरा धरायाम् ॥
यत्पादधावनविधौ जलधिः प्रवृत्तः
सा मातृभूमिरसमानयशःप्रशस्ता ॥ ६ ॥

यत्सन्ततिः प्रथमतः पृथिवीतलेऽस्मिन्
नीतिस्वतंत्रसुविचारपरित्रचित्ता ।
लोकोत्तरा भवति भारतभूमिजाता
तस्याः सुसंस्कृतमतिर्जगतः सकाशात् ॥ ७ ॥

वेषादिभिन्नरुचयोऽपि समानचित्ताः
यद्देशजातमनुजाः सुविचारवृत्ताः ।
धर्मैकनिष्ठमतयः पुरुषार्थसक्ताः
लोकोपकाररसिकाः परमात्मभक्ताः ॥ ८ ॥

शान्तस्वभावभरिताः निजदारसक्ताः
वर्णादिवृत्तिविषये सरला विरक्ताः ।
जातिप्रथाविमुखसन्मतयोऽल्पतृप्ताः
भूलोकवृद्धिनिरता परलोकनिष्ठाः ॥ ९ ॥

पुंवत्स्त्रियोऽपि सततं सुधियः स्वतंत्राः
धर्मादिसर्वविषयेषु विशेषदक्षाः ।
पत्नीसमेतपुरुषाः यजमाननाम-
भाजोभवन्ति भुवने सुखमाप्तकामाः ॥ १० ॥

वर्णादिदूषितमना मनुजः परार्थ-
कुम्भीलको भवति भारतदेशवासी ।
दौर्जन्यपूर्णहृदयः समये व्यतीते
स्वार्थैकरक्तमनसा सुगुणावमन्ता ॥ ११ ॥

यस्याखिलं भुवनमेव निजं कुटुम्बं
कालक्रमेण भवनं भुवन तदीयम् ।
धूर्तो जनो हि सततं भुवनाभिरामः
शास्त्रादिनिर्मितिकलाचतुरः सकामः ॥ १२ ॥

कार्यस्वभावरुचिभिः रचितापि वर्ण-
रीतिः क्रमेण कलुषीकृतजातिरूपा ।
यस्याः बलेन मनुजो मनुजान्तरं तं
सन्तापयन् भवति मानववर्गशापः ॥ १३ ॥

क्षेत्रादिकार्यनिरतोपि यतो मनुष्यः
वर्णाधमो भुवि भवेत् परतन्त्रवृत्तिः ।
वर्णोत्तमो सुगमवृत्तितया सुमान्यः
जातिप्रभावमहिमोऽपि परावलम्बः ॥ १४ ॥

कार्यप्रवृत्तमनुजो धनिनां समाजे
चारित्र्यवानपि महानपि दैन्यपूर्णः ।
कार्यं निजं परकरैरपि कारयंश्च
दुर्वृत्तरक्तहृदयः सुधियां सुमान्यः ॥ १५ ॥

भुक्त्वा स्वयं सकलभोगचयं स्मयास्यः
भार्यारतिं परकरेण न यः करोति ।
पूजां शिवस्य मनुजो धनलेशगर्वाद्
यत् कारत्यनुदिनं परकीयहस्तैः ॥ १६ ॥

तत्सूचयत्यथवनतिं मनुसन्ततेस्तां
या निन्दिता भवति लोकहितप्रसक्तैः ।
येनात्र बुद्धिबलहीननरोऽपि धन्यः
प्राप्य स्वजीवनविधिं सुधियां सुमान्यः ॥ १७ ॥

एकं च सद् बहुविधं भवतीति सत्यं
नानाभिधानवदिति श्रुतिसूक्तिरेषा ।
नानोपचाररसिको विविधस्वरुप–
निष्ठो न संस्मरति देवमतीवगुप्तम् ॥ १८ ॥

सर्पे तरावुपळखण्डतृणेषु तोये
पश्यन्ति देवमतुलं पुनरर्चयन्ति ।
ये लालयन्ति च कपीनपि सारमेयान्
तैरेव मानवगणस्तुलितस्तृणेन ॥ १९ ॥

वेदादिपूर्वसमये परिपूजिता स्त्री
कालक्रमेण गणिता परतन्त्रवृत्तिः ।
कन्याप्रदानसमयेऽप्यधिकारहीना
वेदोपदेशरहिता पुरुषप्रधाना ॥ २० ॥

कामोपभोगकरणं शरणं प्रयाति
पुत्रं सहोदरमहो जनकं सकुल्यम् ।
पुत्रप्रसूरपि पुनः परिपोष्यमाणा
दैन्यप्रतीकमिव भारतदेशनारी ॥ २१ ॥

ये वा श्रमैकनिरताः विरताः स्वसौख्यात्
दैन्यं प्रयान्ति ननु ते धनिनां समाजे ।
अन्योपजीविनमहो मनुतेऽसमानं
धन्यं च पुण्यपुरुषं द्रविणैकमान्यम् ॥ २२ ॥

धर्मोपजीवनिवहो धनधान्यपूर्णो
वित्ताढ्यपूजनपरः परलोकदूरः ।
निन्दन् दरिद्रजनतां परवस्तुसक्तो
भूभौतिके हि रमते विषयोपभोगे ॥ २३ ॥

येषां कृते जगदिदं भवनं विशालं
पूर्वं तु बान्धवगणो मनुजाः समस्ताः
तेषां कृतेहि भवनं भुवनं समस्तं
कार्पण्यदोषहतधीरधुना कुशीलः ॥ २४ ॥

शापादिदक्षयतयो मतिहीनदीना
यातुप्रदानरुचयो रतितुष्ट्यधीनाः ।
दौर्जन्यदर्पसहिता विमुखाः स्वधर्मे
नीतिर्निराश्रयतया हि विरौति देशे ॥ २५ ॥

देवालये विविधभूषणराजिते च
पूजारतैरनुदिनं परिरक्षिते च ।
बन्दीकृतो भवति शम्भुरसीमशक्तिः
धूर्तस्य संग्रहमतेर्विविधैव युक्तिः ॥ २६ ॥

ऐश्वर्यदोपि सकलेष्टगणप्रदोपि
सालंकृतिर्विविधवेषधरो विचित्रः ।
शम्भुर्भवोपि विभवं ह्यभिवाञ्छतीति
सर्वं हि वञ्चनधियामुपजाप एतत् ॥ २७ ॥

यो मूषकादिनिरपेक्षकुजन्तुजालैः
संसर्गदूषणमयं लघिमानमेति ।
शूद्राभिधाननिकृतं मनुजं समाजे
द्रष्टुं समागतममुं स निराकरोति ॥ २८ ॥

नारीगणस्य वयसि प्रथमेहि वर्त-
मानस्य कांक्षितमहो मधुरं शरीरम् ।
तन्मानसी रुचिरकान्तिरुपेक्षिताच
स्वार्थैकरक्तमनसा पुरुषामृगेण ॥ २९ ॥

मूर्खः कुलीन इति संसदि लब्धमानः
वर्णाधमो विमलधीरपि त्यज्यमानः ।
वित्तप्रभावसहितो भुवि वन्दनीयः
हा हन्त राष्ट्रजननी दुरवस्थितेयम् ॥ ३० ॥

वार्धक्यदोषसहिताः पितरः सजीवाः
पुत्राभिमानरहिताः परतन्त्रजीवाः ।
तेष्वन्यलोकनिलयेषु वृथाभिमानं
श्राद्धं हि लौककधिया कुरुतेऽसमानम् ॥ ३१ ॥

सर्वो गुणः द्रविणमाश्रयतीति सूक्तं
लोकप्रसिद्धमपि भारतराष्ट्ररीतिः ।
अर्थार्जनादृतमतिर्मनुजो हि नीति–
मार्गं विलंघयति मानवमौल्यभूतम् ॥ ३२ ॥

एकः श्रमैकनिरतो विरतः स्वसौख्यात्
अन्यस्तु तत् फलरुचिः बहवोऽलसाश्च ।
राष्ट्रं कथं भवति धान्यचयादिपूर्णं
कर्तव्यपालनविधौ विमुखे च राज्ञि ॥ ३३ ॥

भ्रष्टोधिकारनिहितः स्व हितेहि दक्षः
कृत्वा नृपानुकरणं स्वजनैकपक्षः ।
सम्पीडयत्यनुदिनं जनमल्पशक्तिं
सन्तोषमेति करुणाविमुखः सशक्तः ॥ ३४ ॥

शक्तेषु चोरपुरुषेषु नरान्तकेषु
भ्रष्टेषु राजपुरुषेषु पुरान्तकेषु ।
राज्ञि स्वयं व्यसनमग्नमनःप्रवृत्तौ
शक्तः कथं जनहिते जगदीश्वरोऽपि ॥ ३५ ॥

पीत्वा सुरां प्रियतमाधरचुम्बितां तां
भुक्त्वाऽमिषं सकलपापनिधानभूतम् ।
त्यक्त्वार्यनीतिमखिलां सुखलोलुपेऽस्मिन्
देशे कुतः कुमतिशासनकल्पनाऽपि ॥ ३६ ॥

येषां श्रमेण धनधान्यचयादिपूर्णः
लब्धप्रतिष्ठ इह सः परतन्त्रजीवी ।
काव्यादिबन्धरसिको भुवि भोगपूर्णः
तान् कर्मयोगनिरतान् हसतीव धूर्तः ॥ ३७ ॥

मुग्धं जनं सदयमत्र विलोक्य धर्मे
रक्तं सुरालयनिवासकृताभिलाषम् ।
कृत्वैहिकं सुखमतीवमनोहरं च
भुङ्क्ते प्रमोदसहितो ननु धर्मवेषः ॥ ३८ ॥

भूतानुकम्पिहृदयो मृदुमानसोऽपि
यागादिधार्मिकविधौ भवति प्रबुद्धः ।
हिंसारतिर्द्विजवरोऽपि वराक एषः
देशेऽद्य पावनतमेऽपि बिडम्बनैषा ॥ ३९ ॥

येषां प्रजाहितमपेक्ष्य सुखं स्वकीयं
दोलायते न हृदयं सदयं हि मोक्तुम् ।
ते लक्ष्मणाग्रजमुखा प्रभवोल्पतुष्टाः
कुत्रापि दृष्टिपथमद्य न यान्ति राष्ट्रे ॥ ४० ॥

जित्वाऽखिलं जगदिदं वसुवासवादि
चित्तप्रलोभनकरं सहसा विहाय ।
यो वा मखे जनहिते रघुराप्तकीर्तिः
तस्यानुकारि चरितं न कुतोऽपि दृश्यम् ॥ ४१ ॥

धर्मार्थकामविषये परिणीय सीतां
योषान्तरं न रमते मनसापि रामः ।
तस्यानुकारिणमतः पुरुषोत्तमस्य
द्रष्टुं न शक्यमधुना पुरुषान्तरं तम् ॥ ४२ ॥

हत्वाऽहवे दशमुख रजनीचराणा-
मेकेश्वरं शतमखादिभयैकहेतुम् ।
अन्तेष्टिमस्य कुरुते भुवनाभिरामः
नौदार्यमस्ति हृदये पुरुषान्तरस्य ॥ ४३ ॥

भुक्त्वापि भोगमतुलं भुवने विशाले
दत्वाधिकारमवनीतलरक्षणस्य ।
पुत्राय यान्ति तरुमूलमतः स्म भूपाः
राज्यधिकारमधुनापि न जहाति कोऽपि ॥ ४४ ॥

या स्त्री पुरा पुरुषतुल्यबलाऽबलापि
देशाभिमानसहिता कृतलाकहर्षा ।
सैवाल्पबुद्धिरधुना परिवाररक्षा
मग्ना विमुक्तपरलोकहिताभिलाषा ॥ ४५ ॥

सम्पद्भरोपि सकलोऽपि सुबोधपूर्णो
लोकैकवन्द्यविभवोपि पुरा प्रसिद्धः ।
दारिद्र्यदुःखभरितो विपदाभिभूतः
पाखण्डवृन्द विकलो विषमस्थितोऽयम् ॥ ४६ ॥

मग्ने तमस्यविरतं गहनेहि लोके
धर्मेऽपि मूढजनजीविकया प्रवृत्ते ।
राज्ञि स्वयं विषयभोगनिमग्नचित्ते
सूर्योदयो भवति किं हृतलोकचित्तः ॥ ४७ ॥

अस्मिन् पवित्रविषये जिनबुद्धमुख्याः
लोकोपकारनिरताः स्वसुखे विरक्ताः ।
अद्यापि तादृशमहामतयः सुभक्ताः
जायन्त एव चगदुद्धरणे हि रक्ताः ॥ ४८ ॥

शैवागमादिविमलाशयपूर्णचित्ताः
वर्णादिदोषगणदूषणभग्नचित्ताः ।
शुद्धक्रियावचनचिन्तनधूतपापाः
ज्ञानप्रदीपहतनेत्ररुजोहि सन्तः ॥ ४९ ॥

इत्थं निशान्तसमये प्रतिवुद्धलोके
जाते प्रभातसमयेऽरुणरागपूर्णे ।
द्रष्टुं सदातुरतया निभृतं स्थितास्ते
सूर्यप्रकाशमतिनिर्मलमप्रमेयम् ॥ ५० ॥

(स्रग्विणीवृत्तम्)

सूचिभेद्यन्धकारादभीता प्रभा
दर्शनेच्छुश्च यः साधुवृत्तिः स्वयम् ।
अम्बुजैस्तैः समं बालसूर्यागमे
दत्तदृष्टिः स्थितः सस्मितः संयमी ॥ ५१ ॥

इति शिवकवि डा. परड्डी मल्लिकार्जुन विरचिते
'बसवभास्करोदये' महाकाव्ये 'अरुणोदयो' नाम
प्रथमः सर्गः

द्वितीयः सर्गः

(स्त्रग्विणीवृत्तम् ।)

वैष्णवैः शैववंशोद्भवैः पण्डितै-
र्जैनबौद्धादिभिर्या सदाराधिता ।
काव्यबन्धानुरक्तैश्च योषिद्गणैः
राजते हन्त कर्णाटराजेश्वरी ॥ १ ॥

वर्णतो वेषतो भाषयाहारतो
राष्ट्र इत्थं भवेद् भेदपूर्णो यदा ।
मूलतो भारतीया वयं सत्प्रजा
एकता भिन्नतायामियं भारते ॥ २ ॥

यत्र धर्मे स्वकीयेऽपि निष्ठाचला
अन्यधर्मादरो दृश्यतेऽचंचलः ।
आपदुद्धारमग्ना महातेजसो
नागरा ग्रामजाताः पुनर्मानवाः ॥ ३ ॥

दर्शनं नात्र जर्चास्पदं केवलं
जीवनादर्शवृत्तिर्महासाधनम् ।
नीतिपूर्णः पुनर्धर्ममार्गोऽखिलः
स्वर्गतुल्यं यतो लौकिकं जीवनम् ॥ ४ ॥

यत्र चार्वाकनिष्पादनं गौरवाद्
गण्यते पण्डितैर्लोकभूतिप्रदम् ।
सद्गुणग्राहिभिर्यत्र विद्वद्वरैः
लौकिकं पारमार्थं समं सेव्यते ॥ ५ ॥

गायने नर्तने काव्यबन्धे रताः
साक्षरा लब्धमानाः समाजे यतः ।
यत्पुनः सत्कलावर्धकं साधनं
नावजानन्ति ते मानवं निर्धनम् ॥ ६ ॥

यत्र भागीरथी शम्भुजूटस्थिता
देवलोकागता जह्नुकर्णोद्गता ।
क्षेत्रकार्यानुकूला हिमाद्रेः सुता
पावयन्ती जनान् लोकपूज्या यतः ॥ ७ ॥

यत्र सिन्धूनदी सर्वलोकादृता
मातृभूमिं सुवर्णप्रसूनान्विताम् ।
कर्तुमद्यापि शक्ताच्छतोयान्विता
यद्विकाराद्वयं हिन्दवो विश्रुताः ॥ ८ ॥

आगता दूरतो येऽपि दुष्टाशया
निर्गता राक्षसास्तैर्न वासः कृतः ।
येऽपिवात्र स्थिताः भारतीयाः कृताः
अस्मदीयं महासंस्कृतं भारतम् ॥ ९ ॥

वित्तहीना नरा यत्र सत्यान्विता
वित्तपूर्णा जनास्त्यागशीलान्विताः ।
हिंसनं यत्र सर्वैर्जनैः खण्डितं
शान्त्यहिंसामयं सन्ततं भारतम् ॥ १० ॥

शंकराचार्यमध्वादिवेदान्तिनो
बुद्धमुख्या जगन्मोक्षदाने रताः ।
वीरशैवादयो यद्यशोगायकाः
नीतिधर्मप्रसिद्धं क्षितौ भारतम् ॥ ११ ॥

यत्र कृष्णादिनद्यः सुधावर्षणाद्
देशमृत्संकुलं कुर्वते काञ्चनम् ।
यत्सुतीर्थप्रवासाप्तपुण्यो जनः
येन श्रेयोऽभिलाषेण धन्यं मनः ॥ १२ ॥

तुगङ्भद्रादिभिः सस्यपूर्णं कृतं
यत्स्थलं पावनेनाम्भसापावितम् ।
चन्द्रभागानदीतीरहारायितं
गोमतीतोयसंवर्धितं भारतम् ॥ १३ ॥

यद् हिमाद्रिप्रभावात् स्वयं रक्षितं
शत्रुभिश्चण्डवातैश्च पीडाकरैः ।
सागरैर्गौरवाद् यत्पदं चुम्बितम्
यत्प्रकृत्या समोदं सदालंकृतम् ॥ १४ ॥

सोमनाथाख्यया सुप्रसिद्धः शिवो
यत्र भव्यालये नित्यमाराध्यते ।
यत्सपर्यासुकाले समुद्रो महा-
दुन्दुभेर्नादमुत्पादयेत् सादरम् ॥ १५ ॥

यत्र कोणार्कपुर्यां दिनेशः परः
भूरिविख्यातिभाग् भूतले राजते ।
यत् पुरे वै जगन्नाथनामा हरिः
लोकमान्यः सदा मोदते भारते ॥ १६ ॥

यत्र कन्याकुमारीति शम्भुप्रिया
सागरेणातुलेन स्वयं सेविता ।
यत्र रामेश्वरो दक्षिणाधीश्वरः
भव्यतादिव्यतालंकृतो राजते ॥ १७ ॥

यत्र वाराणसीक्षेत्रवासः शिवः
विश्वनाथाख्यया ह्यन्नपूर्णाधवः ।
गंगया सेवितोऽनङ्गशत्रुः स्वयम्
विश्ववंद्यो जगद्रक्षको सस्मितः ॥ १८ ॥

यत्र शैलादिवासः पुरान्तः प्रभुः
आत्मशक्त्या समेतः पुनः शंकरः ।
यं हि दृष्ट्वा पुनीतो विनीतो नरः
मुच्यते बन्धनात् नित्यपीडाकरात् ॥ १९ ॥

कालिदासादिभिर्यत्तु संकीर्तितं
स्वीयकाव्येषु भूलोकसंचारिषु ।
व्यासवाल्मीकिसद्ग्रन्थसम्मानितं
प्रज्ञया विश्वसंमानितं भारतम् ॥ २० ॥

वेदवेदान्तशास्त्रागमानां गणः
पोषितः संस्कृतेर्वर्धनार्थं यतः ।
यत्र सर्वाः कलाः काव्यमुख्याः श्रुताः
देशकीर्तिप्रसारक्षमा भूतले ॥ २१ ॥

यत्र गार्गीति योषिद्गुणालंकृतिः
आत्मजिज्ञासया ब्रह्मविद्यारता ।
विज्जिकाद्याः स्त्रियः काव्यबन्धक्षमाः
शास्त्रचर्चारताः पण्डिताग्रेसराः ॥ २२ ॥

यत्र कर्णाटदेशो विशालः सदा
राजते स्वर्गतुल्यः समृद्धो मुदा ।
वैभवं वर्णितुं य-य लोकाधिकं
नास्ति शक्तो विशालेऽपि लोकत्रये ॥ २३ ॥

साक्षराः काव्यबन्धक्षमास्ते यथा
येऽपि शिक्षाविहीनाः पुनस्ते तथा ।
ग्रामजातोहि मुग्धः सदा सत्कला-
लापमग्नो रसास्वाददक्षोऽमलः ॥ २४ ॥

यत्र नानाविधाचारिणो मानवाः
स्नेहवृत्त्या वसन्ति स्म बद्धादराः ।
नीतिवाक्यामृतास्वादतृप्ता यतो
धर्मनिष्ठा परद्वेषरूपा न सा ॥ २५ ॥

यत्र सर्वेस्वयं कर्ममग्ना यतः
कर्णजापः क्वचिन्नैव कार्यस्ततः ।
लोककर्णेषु वार्तान्ति यस्याद्भुता
येन कर्णाट शब्दो जगद्विश्रुतः ॥ २६ ॥

शुद्धमुक्तामयं रत्नजातं पुन-
र्भूरिराशीकृतं यत्र विक्रीयते ।
यत्र वाणिज्यमग्नः सुसंस्कारवान्
वञ्चको नास्ति धर्मानुरागी नरः ॥ २७ ॥

क्षेत्रकार्यादिमग्नेऽजडे मानवे
नास्ति चोरोऽथवा भिक्षुको दानवः ।
यत्र विद्याभिमानी जनः संस्कृतः
कर्मयोगानुरागी पुनः संस्कृतः ॥ २८ ॥

वार्धके यत्र यूनां कृते सज्जना-
स्ते तृतीयाश्रमे रागिणः पावने ।
यत्र माता पिताचार्यवर्गोऽतिथिः
पूज्यते देवतुल्यो गृहस्थैश्चिरम् ॥ २९ ॥

यत्र नैकेषु देवेषु नानाविधा-
कारवर्णेषु चिन्त्योऽद्वितीयेश्वरः ।
वेदवाक्यामृतास्वादमग्ना नराः
एक एवाद्वितीयःप्रभुस्तत्त्वतः ॥ ३० ॥

अन्ययोषिद्व्रतोपेक्षया संयमात्
स्वीयभार्यारतास्तुष्टचित्ता नराः
रावणः कौरवो वा दुराचारवान्
यत्र साधोस्तिरस्कारपात्रं मतः ॥ ३१ ॥

ब्रह्मचर्याश्रितैर्यत्र विद्यार्थिभिः
सद्गुरुस्तोषितः सेवया नैष्ठिकैः ।
प्राप्तविद्या गृहस्थाश्रमाराधकाः
सर्वलोकोपकारक्षमाः साधकाः ॥ ३२ ॥

यत्र कृष्णः सुदामार्चकः श्रीपति-
र्वैभवोपेतवेश्मस्थितोऽपि प्रभुः ।
यत्र सर्वेऽधिकारस्थिताः मानवा-
स्तत्त्ववित्सूक्तिमन्त्रैर्विनीता नता ॥ ३३ ॥

यत्र भार्यावचो नैव वेदान्तवाग्
दुष्टपुत्रोदितं नीतिवाक्यामृतम् ।
यत्र मात्रोदितं वै शिरोवन्दितं
सद्गुणालंकृतं वेदसारायितम् ॥ ३४ ॥

यत्र धूर्तो जनैर्दूरमुत्सारितः
मित्रता गौरवेणादृताऽकृत्रिमा ।
बान्धवो नीतिहीनो धनाढ्यो महा-
शत्रुवन्निन्दितो नेक्षितोऽवज्ञया ॥ ३५ ॥

यत्र कार्यश्रमो देवपूजा भवेद्
यत्र तन्द्रा विनिन्द्या समाजे सताम् ।
यत्र भिक्षाटनं गर्हितं मानिभि-
र्वर्धकं सद्विवेकान्वितं संमतम् ॥ ३६ ॥

बिल्हणो यत्र काश्मीरदेशागतः
पण्डितः सत्कविः पूजितोऽधीश्वरैः ।
विक्रमांकाख्यदेवस्य वृत्तं शुभं
कीर्तितं येन चन्द्रप्रभासंनिभम् ॥ ३७ ॥

कोकिलाः हर्षपूर्णा मधौ गायने
लीनचित्ताश्च चिन्ताविहीना यतः ।
यन्मयूराः घनालोकनानन्दिताः
नर्तनाराधने तत्परास्ते ततः ॥ ३८ ॥

शौर्यगाम्भीर्यदक्षो मृगाधीश्वरो
यः स्वयं राजतेऽरण्यवासेऽ समः ।
प्राणिभिर्वर्तनं यस्य सद्योहतै-
र्येन सर्वेऽभिमानाद्वयं हि हर्षिताः ॥ ३९ ॥

(वसन्ततिलकवृत्तम्)

इत्थं पुराण समये प्रथितोऽपि देशः
धान्यादिपूर्णविभवो भवभूतिहासः ।
दारिद्र्यमौढ्यमतिना भुवि भारभूतः
कालक्रमेण सुतरामपहास्यपात्राम् ॥ ४० ॥

इति शिवकवि डा. परड्डी मल्लिकार्जुनविरचिते
बसवभास्करोदये महाकाव्ये मातृभूमिस्तवनं नाम

द्वितीयः सर्गः

तृतीयः सर्गः

(वसन्ततिलकवृत्तम् ।)

कर्णाटरम्यविषये यमिनां वरेण्यः
श्रीमादिराज इति शैवकुलाग्रगण्यः ।
वेदादिशास्त्रनिपुणोऽ तिविशालचेताः
चारित्र्यशुद्धिरवनीतलमौलिभूतः ॥ १ ॥

मादाम्बया परमसात्त्विकवृत्तयासौ
गार्हस्थ्यजीवनसुखानुभवैकधन्यः ।
योषान्तराणि जननीमिव मन्यमानः
सर्वोपकारनिरतो गृहकार्यमग्नः ॥ २ ॥

तौ दम्पती सुरतसौख्यमभूतपूर्वं
लब्ध्वापि शान्तमनसौ कृतशम्भुपूजौ ।
सन्तुष्टपूर्णहृदयावपि पूर्णचन्द्र-
तुल्यात्मजातरहितौ सुतरां सचिन्तौ ॥ ३ ॥

ज्योतिष्यशास्त्रचतुरैरपि धर्मवृद्धै-
र्वेदादिशास्त्रनिपुणैरुपदिष्टमेतत् ।
श्रद्धासमेतमखिलं कृतकृत्यभावाद्
भक्त्या समाचरितमेव सुताभिलाषात् ॥ ४ ॥

तीर्थप्रवासमसकृच्छिवभक्तिपूता-
वाचार्यवर्गगदितं कुरुतः स्म शान्तौ ।
देवालयेषु शिवपूजनकार्यतोषौ
पुत्रास्यदर्शनकृते कृतदेहशोषौ ॥ ५ ॥

ये साधुयोगिगणनाप्रथिताः पृथिव्यां
लोकोत्तरासु कतिचिन्निरताः क्रियासु ।
यैर्वा विमुग्धजनता विवशीकृता च
तेषामुदारचरितावुपचारदक्षौ ॥ ६ ॥

लोके स्वकीयकुलमुन्नतिमेति येन
धन्यौ च येन पितरौ नितरां सलोभौ ।
दाम्पत्यमद्य सफलं सरसं च तेन
पुण्योदये हि सुतदर्शनभाग्यलाभः ॥ ७ ॥

लोकाभिरामतनयाननपद्मलाभ-
लोभात् कठोरनियमेष्वपि तुष्टचित्तौ ।
सच्चन्द्रिकाचयनलाभकृते विरौति
सन्तापदीनमनसा तृषिरश्चकोरः ॥ ८ ॥

नानाविधैश्च नियमैः समुपस्थितौ तौ
शुद्धान्तरङ्गवपुषौ यमशुद्धसत्त्वौ ।
वैराग्यपूर्णहृदयावनुरक्तचित्तौ
पुत्रेषणं जगति जन्मवतां स्वभावः ॥ ९ ॥

पुत्रोदयं प्रति समाहितमानसेन
सन्तापमेत्य नितरामपि हर्षपूर्णौ ।
नायासितौ नियमजेन बहुश्रमेण
लभ्योऽन्यथा भुविकथं भुवनैकवन्द्यः ॥ १० ॥

त्यक्त्वा व्रतं सकलशास्त्रनिरूपितं यत्
कृत्वापि तानि विविधानि वृथा व्रतानि ।
सिद्धिं न याति मनुजः शिवपूजकोऽपि
नन्दिव्रतं प्रति तदाहृतमानसौ तौ ॥ ११ ॥

नन्दीश्वरः शिवसमानमहाप्रभावः
श्रीशम्भुवाहनतया भुवनैकमान्यः ।
भिन्नोप्यभिन्नहृदयो ननु शम्भुनाथः
तत्तोषहेतुरधुना व्रतराजराजः ॥ १२ ॥

तौ दम्पती परमसात्त्विकचित्तवृत्त्या
नन्दीशभव्यभवनागमनप्रवृत्तौ ।
श्रद्धामयौ नियमितात्मशरीरधर्मौ
शैलाधिराजतनयेश्वरभक्तियुक्तौ ॥ १३ ॥

नक्तं प्रभातसमये दिनमध्यभागे
सायन्तनेऽपि सततं कृतनन्दिपूजौ ।
तस्य प्रभावमतुलं भवतापदूरौ
स्वीकृत्य तुष्टमनसा भवभक्तिभाजौ ॥ १४ ॥

नन्दीशमन्दिरगतौ विधिवत्प्रणाम-
नम्राननौ व्रतविधानबहुप्रयासौ ।
नन्दिप्रसादपिशुनं कुसुमं प्रफुल्लं
लब्ध्वा सती विगतशोकवती बभूव ॥ १५ ॥

तस्मिन् प्रसन्नमनसि प्रथिते महात्म-
नन्दीश्वरे हिमवतो दुहितुः प्रियस्य ।
आज्ञानुसारममलं शिवभक्तिपूतं
गर्भं विवेश सहसा महिलामणेः सः ॥ १६ ॥

गर्भस्थितिश्च महितस्य शिवान्तरस्य
नन्दीश्वरस्य सहसा शिवयोगनिद्रा ।
ध्यायन् हिमाद्रितनयारमणं प्रवीणः
विश्रान्तिमाप दयया जगदीश्वरस्य ॥ १७ ॥

गर्भोदये च विविधा शुभकामना याः
प्रादुर्भवन्ति सहजा अपि भिन्नरूपाः ।
देवार्चनं गुरुगणस्य पदार्चनं च
तीर्थप्रसादरसिका कुरुते हि साध्वी ॥ १८ ॥

एतत्पुराणगदितं जगति प्रसिद्धं
विश्वासपात्रमभवच्छुभमानसानाम् ।
लोकस्य तृप्तमनसो बसवाभिधाना
क्रान्तिर्विचारमथिता सकलेवरेयम् ॥ १९ ॥

आक्रन्दनं जगति मुग्धजनस्य दुष्ट-
वर्णाश्रमादिविधिना बहुपीडितस्य ।
रोषान्वितं परमसात्त्विकभावनिष्टं
साङ्गं बभूव बसवेश्वरनामधेयम् ॥ २० ॥

यावद्विवेकसविता भुवनेऽस्तमेति
तादत्तमो जनमनःस्थितमौढ्यरूपम् ।
मार्ताण्डमण्डलशुशोदयसन्निधाने
ध्वान्तं प्रचण्डमपि नाशमुपैति लोके ॥ २१ ॥

साध्वी स्वकीयवदनस्मितशुभ्रकान्त्या
जित्वा सुधांशुमधुनाहि कलङ्कपूर्णम् ।
गर्भस्थनन्दिरुचिर्निर्जितकोटिभानुः
धन्या विलोकनपरस्य जनस्य मान्या ॥ २२ ॥

यद्गर्भवासविनिमुक्तमलत्रयायाः
सत्याः कलेवरमिदं सहजं पवित्रम् ।
नन्दीश्वरो ननु रतो विरतः समाधौः
योगीश्वरस्य सततं सहजा समाधिः ॥ २३ ॥

पञ्चाक्षरीपरमपावनराजमन्त्र-
मोंकारपूर्वमसकृन्मनसा च वाचा ।
लिङ्गाङ्गयोगसुलभीकरणैकतन्त्र-
मुच्चारयत्यनुदिनं शिवयोगनिद्रः ॥ २४ ॥

श्रीमादिराजतरुणी तरुणीमणीना-
मग्रेसरा शिवकलापरिपूर्णगर्भा ।
भर्तुर्विलोकनसुधांशुसमप्रकाशा
मातृत्वमेव परिणीतकुलाङ्गनाशा ॥ २५ ॥

यद् भक्तिरीशचरणे परमा स्थिरा च
यस्यागमे च सहजा गतिरीश्वरोक्ते ।
यो वा महान् शिवगणे शिववाहनं च
सोऽयं तपश्चरति पुण्यवतीसुगर्भे ॥ २६ ॥

गर्भालसाऽपि सततं विमलस्वभावा
शम्भुप्रसादबलनिर्जितचन्द्रहासा ।
मातृत्वगौरवयुतामितनम्रभावा
लोकैकमान्यविभवा कृतभर्तृतोषा ॥ २७ ॥

(शार्दूल विक्रीडितवृत्तम्)

पत्युः प्रेमभरेण बान्धवकुलप्रीत्या सखीसेवया
लोकाराधनतो विहारजनितानन्देन जातश्रमा ।
पूर्णाशा विविधाभिलाषभरिता भूलोकसंभाविता
पुत्रप्राप्तिमुदा सदैव जननीभारोऽपि हारायते ॥ २८ ॥

(मातुः स्वात्मजजन्मपावनतरं संसारसारायते)

खदालस्यभावा गिरीशकृपया नन्दीशसन्तोषतः
श्रीशैवागमसारभूतशिवयोगोद्धारकर्तृप्रसूः ।
सद्योऽभूद् गुरुसंगमेशकरुणालेशेन धन्या सती
येनात्यन्तमभूज्जगत्त्रयमिदं भाग्योदयप्रीणितम् ॥ २९ ॥

आनन्दं शिवधर्मिणो गुरुतरं चान्यादृशं लेभिरे
दैन्यं धर्मविरोधिनः कुमतयः सर्वाधिकं भेजिरे ।
तुष्टाः सज्जनपुंगवाः क्षितितलालंकारभूताः परं
सर्वं तत्क्षणमेव तेन भुवनं स्वर्गोपमं पामरम् ॥ ३० ॥

(उपजातिवृत्तम्)

पिता पुनीतो जननी च धन्या
तुष्टं कुलं बन्धुजनोऽपि मान्यः ।
सुधार्मिकः पौरजनोऽतिहृष्टः
भानूदये लोकतमोऽपि नष्टम् ॥ ३१ ॥

इति शिवकवि डा. परड्डी मल्लिकार्जुन कृते
बसवभास्करोदये महाकाव्ये भानूदयो नाम तृतीयः सर्गः ।

चतुर्थः सर्गः

(उपजातिवृत्तम् ।)

पुत्रोत्सवो वैदिकधर्मरीत्या
पुरे महासंभ्रमपूर्ण एव ।
उदारहस्तः खलु मादिराजः
प्रीणाति विप्रान् विविधोपचारैः ॥ १ ॥

श्रीमादिराजः सुतजन्मतुष्टः
कृतार्थतामित्यभिनन्द्यमानः ।
जयन्तजन्माधिकतोषपूर्णः
साफल्यमाप्नोति यथा सुरेन्द्रः ॥ २ ॥

शास्त्रोक्तरीत्या विमले कृतेऽस्य
जन्मोत्सवे बाधकसाधने च ।
स्तन्यं न मातुर्बसवेन पीतं
येनाभवत्सर्वजनस्य चिन्ता ॥ ३ ॥

दृढव्यथोऽभूत् जनको जनन्या
दुःखं नवं गाढतरं तरुण्याः ।
वेदादिशास्त्रोक्तविधानदक्षा
परं विवर्णा मुदिता विपक्षाः ॥ ४ ॥

यदा गुरुः संगमनामधेयः
शिशुं समागत्य विभूतिदानात् ।
प्रसन्नचित्तः सदयं मुदा तं
निरीक्षते स्वस्थमतिः प्रवीणः ॥ ५ ॥

अयोनिजो गर्भगतो जनन्याः
स्तनंधयः पूर्णविवेकिमान्यः ।
जातो जगत्यां भवपाशमुक्तः
पाण्डित्यपूर्णः शिवभक्तियुक्तः ॥ ६ ॥

यदा स्मरत्यात्मबलेन युक्तः
मुखोद्गता चागमशुद्धविद्या ।
महात्मनो लोकहितानुरक्ते-
र्निमित्तमात्रं गुरुसत्तमोऽपि ॥ ७ ॥

तथापि लोकव्यवहारमार्गे
प्रवर्तमानो बसवः कुमारः ।
स्वलीलया शैशवयोग्यया च
चकार नेत्रोत्सवमात्मपित्रोः ॥ ८ ॥

अंके स्वमातुः स्वपितुः क्रमेण
सलीलमास्ते करुणार्द्रदृष्टिः ।
आलक्ष्यदन्तावलिरीषदीषत्
स्मितास्यपद्मः कृतलोकतुष्टिः ॥ ९ ॥

साहित्यसंगीतकलाप्रवीणो
वेदान्तशास्त्रागमपण्डितोऽपि ।
कौटिल्यशास्त्राध्ययनोग्रभावः
दीनोपकारैकमृदुस्वभावः ॥ १० ॥

परित्यजन् कन्दुकखेलनादि
बालानुरूपं विमलस्वभावः ।
गिरीशपूजानिरतः प्रसन्नो
विचित्रभावो गिरिशप्रभावः ॥ ११ ॥

विचारमग्नः शुभकामनोऽपि
दीनैकबन्धुः करुणैकसिन्धुः ।
लोकोपकाराहितचित्तवृत्तिः
सदाशिवे लीनमनःप्रवृत्तिः ॥ १२ ॥

पतिः पशूनामिति यः प्रसिद्धः
तस्यांशभूतः भवपाशबद्धः ।
देही स्वरूपस्मरणेन शुद्धः
तस्मिन् विलीने शिवयोगनिद्रः ॥ १३ ॥

स चाष्टवर्षीयकुमारकोऽभूत्
यज्ञोपवीतोत्सवसंभ्रमेण ।
यदा पिता बालकमात्मजातं
तदर्थमज्ञोहितमादिदेश ॥ १४ ॥

पितुर्वचस्तर्कविचारपूर्णं
विवेकयुक्तः शिवभावपूर्णः ।
तिरश्चकारात्मबलैकनिष्ठः
शिवागमज्ञानविवेकतुष्टः ॥ १५ ॥

यदात्मदीये शुभमन्दिरेऽस्मिन्
जातोऽहमज्ञाननिवारणाय ।
तदा गुरुः संगमनामधेयः
नियोजयामास शिवव्रताय ॥ १६ ॥

(वसन्ततिलकवृत्तम्)
त्वत्कर्मकाण्डविधिभिर्भवरोगबाधा
स्वर्गादिनश्वरफलग्रहणं जघन्यम् ।
मच्छम्भुभक्तिविधिना शिवलिङ्गयोगात्
मोक्षस्थितिः करतलेऽत्र न हि जन्मबाधा ॥ १७ ॥

वर्णाश्रमादिविषये पशुमारणादौ
घोरेऽपवित्रकुपथे भवतापपूरे ।
किं पातयस्यदयमेव पुरारिभक्तं
मां शैवमार्गरसिकं भवतापदूरम् ॥ १८ ॥

श्रुत्वा वचस्तनयवक्त्रवनिर्गतं तत्
पुत्रोपदेशनिपुणः पुनरेव वाक्यम् ।
श्रीमादिराजसुधिया कुलधर्ममार्ग-
रक्तेन हन्त गदितं प्रभुसम्मितं यत् ॥ १९ ॥

जातः कुले भुवनमण्डलमण्डितेऽस्मिन्
त्वं वत्स लोकपरलोकहितानुबन्धे ।
अस्मत्समस्तपितरस्तव तर्पणेन
तृप्तिं प्रयान्ति नितरामिति मे मनीषा ॥ २० ॥

पुत्रः पितुर्वचनपालनतत्परः स्यात्
पुत्रोपकाररसिको जनकः स्वभावात् ।
त्वज्जन्मपूतमधुना प्रथितं कुलं मे
मद्वंशमौलिमणिरेव भवान् महात्मन् ॥ २१ ॥

यद्विप्रवंशजननं जगतीतलेऽस्मिन्
वन्द्यं यतः सकललोकमनोऽभिलाषः ।
दैवात्तवोत्तमकुले जननं मदीये
किं वा न तृप्तिरधुना तनय त्वदीया ॥ २२ ॥

यद्वेदशास्त्रविधिना करणीयमस्ति
तत्त्वं किमर्थमधुना विफलीकरोषि ।
सद्वंशमौलिमणिना शुभवंशवृक्ष-
विच्छेदने परशुना ग्रहणं कृतं किम् ॥ २३ ॥

वेदादिशास्त्रगदिताः सकलाः क्रियास्ता-
स्त्यक्त्वा हि पुण्यधनलब्धकुले विशिष्टे ।
वत्स स्थितिस्तव कथं प्रथितप्रभावे
विप्राः सहन्ति किमु ते कुलधर्मनाशम् ॥ २४ ॥

नानाविधार्चनविचित्रशुचिव्रतैश्च
शम्भुप्रसादजननं मम भागधेयात् ।
प्राप्तो भवान् हि तनयः शुभनामधेयः
पुण्योदये भवति भूरिविभूतिलाभः ॥ २५ ॥

स त्वं मदीयविमलोदयमत्यमूल्यं
सवर्धयन् विचर मूर्धनि कीर्तिभाजाम् ।
लोकोपकाररसिकः सुकुलावतंसः
पित्रोः प्रसादजननं तनयप्रयासः ॥ २६ ॥

भोगापवर्गसुगमाधिगमाय शुद्धं
वेदादिशास्त्रविहितं करणीयमेव ।
इत्थं विचारनिपुणो भव पुत्र पूर्वं
शास्त्रं सतां जगति चक्षुरिति प्रसिद्धम् ॥ २७ ॥

वेदः प्रमाणमिति यद्गदितं समस्तैः
पाण्डित्यपूर्णमतिभिः यतिभिः पुराणैः ।
तच्छिष्टमार्गरमणं सुधियां प्रशस्तं
मार्गान्तरं भवति खेदकरं नवीनं ॥ २८ ॥

त्वत्प्रीतिजीवनपरा जननी त्वदीया
त्वत्प्रेमहर्षसहितं हृदयं मदीयम् ।
त्वत् प्राप्ति गर्वसहितोऽखिलबन्धुवर्गः
त्वद्दृष्टिपातसफलाः सुजना विधेयाः ॥ २९ ॥

एतावदेव जनकः प्रणयाद् गदित्वा
तूष्णीं स्थितस्तनयनिर्णयकातरः सन् ।
लोकैकबन्धुरवदत् पितरं विमूढं
वेदादिकूपपतितं व्यथितं वृथैव ॥ ३० ॥

श्रीशाम्भवं व्रतमुदारमतिश्चरिष्यन्
तातोपदेशनिपुणः बसवः कुमारः ।
यत् कर्मकाण्डगदितं भवदर्चनीयं
संसारकूपपतनैकफलं सपीडम् ॥ ३१ ॥

तत्तीक्ष्णयन्त्रपतितं मुहुरीक्षमाणः
मां तुष्टिमेषि कथमात्मजमप्रमेयम् ।
वेदप्रमाणगणितेषु हि दर्शनेषु
निःसारतत्त्ववचनप्रभवं हि तत्त्वम् ॥ ३२ ॥

यद् भक्तिभावरचितं मृडदर्शनं त-
न्मोक्षैकसाधनमिदं प्रथितप्रभावम् ।
मिथ्यात्वमस्यजगतः प्रवदन्ति सन्तो
वेदान्तशास्त्रनिपुणा विविधप्रमाणाः ॥ ३३

शैवागमोक्तमवनीतलसत्प्रसादं
स्वीकृत्य तुष्यति शिवैकमनाः प्रवीणः ।
संसारमेतदखिलं शिवशक्तिजातं
भक्त्या निवृत्तिपरया शिवलीनमन्ते ॥ ३४ ॥

मृत्योरनन्तरमियं भुवनान्तरे हि
मुक्तिर्भवत्यसुकरं ननु वैदिकस्य ।
लिङ्गाङ्गसौख्यसहितस्य सशरीरमुक्तिः
संसारतारणमहो सुकरं समोदम् ॥ ३५ ॥

श्रीशम्भुलिङ्गमनिशं स्वशरीर एव
सन्धारयन् सततमर्चनतत्परः सन् ।
तीर्थप्रवासरहितः सहितः शिवेन
मुक्तश्चरत्यनुपदं शिवभावपूतः ॥ ३६ ॥

यः काकनीडनिलयो निभृतो सलीलं
पुंस्कोकिलो मधुरनादमनोऽनुकूलः ।
काकस्वभावकटुतां विषमां कदापि
न स्वीकरोति सुमतिर्मधुरोक्तिशीलः ॥ ३७ ॥

दैवाच्च वैदिककुले विषमेऽनुदारे
जातोस्मि तात तव पुण्यगुणप्रभावात् ।
पंकेऽपि जातममलं कमलं सुदैवात्
लिप्तोऽस्मि नैव कुमतेन भवत्प्रियेण ॥ ३८ ॥

भक्तिः प्रसादजननी जननीव पुण्या
ज्ञानं शिवाशयमयं शिवयोगमान्यम् ।
शम्भुप्रसादकरणं वृतमात्मपक्षं
आराधनं च गिरिजारमणैकलक्ष्यम् ॥ ३९ ॥

जीवेशभेदगणना प्रथमं यदि स्या-
दद्वैतमोदजनकं सुमतेऽन्ततः स्यात् ।
सर्वश्रुतिप्रथितमेकमत विचित्रं
शम्भूक्तदर्शनमिदं परमं पवित्रम् ॥ ४० ॥

भोगापवर्गफलदं सकलोपकारि
शुद्धक्रियाप्रथितमात्महितानुसारि ।
लिङ्गादिभेदगणनाविमुखं सुरम्यम्
पूजोपचारसकलं विरलं प्रकाम्यम् ॥ ४१ ॥

सर्वोदयं प्रति सदाहितसर्वयत्नं
शैवागमोक्तमतमद्भुतदिव्यरत्नम् ।
त्यक्त्वा तदद्य भुवने भवतापहारि
न स्वीकरोमि मतमत्र तवापकारि ॥ ४२ ॥

यस्मिन् मते तरुगणोऽपि जलाशयोऽपि
ग्रावादिजीवरहितोऽपि सदैव धन्यः ।
तस्मिन् त्वदीयकुमते मनुजोऽवमान्यः
वर्णाश्रमादिविधिना व्ययकारिणापि ॥ ४३ ॥

धूर्तोपकारचतुरं कृतभेदभावं
यज्ञादिहिंसनपरं सुधियां च हेयम् ।
मुग्धापकाररसिकं विविधोपचारं
त्वद्दर्शनं तु तमसावृततत्त्वसारम् ॥ ४४ ॥

यस्मिन् शिवस्तनुगतः शरणागतानां
दीक्षामलो गुरुकृपार्जितपुण्यपाकः ।
देवालयो जगति मानवदिव्यदेहः
तत्तूक्तमस्ति किमु तत्त्वसुधाभिषिक्तम् ॥ ४५ ॥

यस्मिन्मते पशुपतिः करुणासमुद्रः
पाशं भिनत्ति शरणागतमानवानाम् ।
सायुज्यदानरसिकः शुभमानसानां
अन्यादृशं विमलदर्शनमादिशैवम् ॥ ४६ ॥

श्रीशंकरो मम पिताऽतुलशक्तियुक्तः
माता च लोकजननी हिमवत्तनूजा ।
मित्राणि बोधविभवाः शिवभक्तिपूताः
सर्वं विशालभुवनं भवनं मदीयम् ॥ ४७ ॥

इत्थं वदन् जनकमन्दिरवासकांक्षां
संत्यज्य संगमगुरोर्निकटं प्रयातुम् ।
आपन्नसत्त्वविमलात्मसमानधर्म-
नागाम्बिकाख्यभगिनीमिदमाचचक्षे ॥ ४८ ॥

श्रीजातवेदमुनिपुंगव संनिधाने
चाध्येतुमद्य शिवयोगमनाकुलोऽहम् ।
गच्छामि लोकहितमाचरितुं यतिष्ये
इच्छास्ति चेदनुसरात्महितानुरक्ता ॥ ४९ ॥

उक्तं तदा परमसात्त्विकयानुजः सः
किं वा करोमि भवता रहिता प्रशस्तम् ।
यत्र स्थितो भुवि भवान् बसव प्रसन्नः
कल्याणपुण्यवसतिर्विपदोऽवसन्नाः ॥ ५० ॥

(इन्द्रवज्रावृत्तम् ।)

इत्थं विनिश्चित्य दृढव्रतौ तौ
पुण्यां गतौ संगमवासभूमिम् ।
तौ दम्पती पुत्रहितानुरक्तौ
मूर्च्छां गतौ दुःसहदुःखभारात् ॥ ५१ ॥

इति शिवकवि डॉ. परड्डी मल्लिकार्जुन विरचिते
'बसव भास्करोदये' महाकाव्ये बसवनिर्गमनं
नाम चतुर्थः सर्गः ।

पञ्चमः सर्गः

(विबुधप्रियावृत्तम् ।)

त्यक्तवैदिकधर्मरीतिरुदारचारुशिवार्चनः
शम्भुभक्तसमागमैकसनाः मनस्विजनार्चितः ।
सोदरीसहितः स्वबन्धुजनोज्झितः सहसा मिथः
जातवेदमुनिप्रशान्तकुटीरवासमनोरथः ॥ १ ॥

आगतं शिवधर्मपालनतत्परं बसवप्रभुं
सर्वलोकहितैषिणं कुमतप्रभावनिवारणम् ।
संगमेशबहुप्रियं जननेत्रवृन्दशशिप्रभं
वीक्ष्य भक्तगणो महामुदितोऽभवद्भयहारिणम् ॥ २ ॥

मातुलो बलदेवमन्त्रिवरो विचारपरोऽमलः
मादिराजसुतं त्रिलोकनुतं मतं सुधियामलम् ।
सद्गुणादृतलोकवन्दितकन्यकामणिभाजनं
संमतं शिवभक्तिपूतजनस्य तं मनुते यदा ॥ ३ ॥

प्रस्थितं बलदेवनामकमन्त्रिमुख्यपदांकितः
सत्वरं बसवं समीक्ष्य तदाद्भुतोज्वललक्षणम् ।
कन्यया सहितः प्रशान्तमना विवाहसमुत्सुकः
पार्वतीसहितो हिमालयपर्वतो गिरिशं यथा ॥ ४ ॥

शम्भुभक्तिरमन्दमूर्तिमतीव सा गम्बाम्बिका
शैवसम्मतबोधमूर्तिरिवाखिलो बसवेश्वरः ।
भक्तिबोधसमागमो भुवनैकमङ्गलकारणम्
दुर्मतोक्तविचारजन्यमहाविषानलवारणम् ॥ ५ ॥

तद्द्वयोर्विधिवद्विवाहविचारमग्नमनाः स्वयं
मुख्यमन्त्रिपदोन्नतोऽपि मुदा तदा विनयान्वितः ।
प्रार्थयामासोत्तमं बसवं विवाहकृतेऽभयं
अन्यथा दुहितुःपिता लभते वरं कथमीदृशम् ॥ ६ ॥

मत्सुताविनयान्विता गुणपूजिता मम जीवितं
त्वत्कृते परिपालिता शिवभक्तिपूतमता सती ।
त्वत्क्रियासहचारिणी सहधर्मिणी शुभलक्षणा
स्वीकरोतु भवान् कृपार्णव सर्वलोकविलक्षण ॥ ७ ॥

संगमो युवयोर्भविष्यति सर्वलोकमनःप्रियः
चन्द्रचन्द्रिकयोर्यथा जननेत्रवृन्दसुखप्रदः ।
चूतवृक्षलतासमागमवत् सदा विबुधप्रियः
स्वीकरोतु भवानिमां मम पुत्रिकां गुणभूषिताम् ॥ ८ ॥

अद्रिराजमुमासमेतमुपस्थितं गिरिशोयथा
आगतं बलदेवमन्त्रिणमुत्तमं तनयान्वितम् ।
लोकवन्दितशम्भुभक्तगणार्चितो बसवेश्वरः
तोषयामास स्वयं प्रियवादिनं विनयान्वितः ॥ ९ ॥

भूरियं तव पादपद्मयुगार्पणान्ननु पाविता
वीक्षणात्त्व दिग्गणोऽपि शिवागमज्ञ पवित्रितः ।
त्वद्यशोविमलीकृतं गगनं पुनर्गगनोपमम्
भागिनेयतया तवापि जनप्रियो जडधीरहम् ॥ १० ॥

तां समीक्ष्य सुताममात्यवरस्य शम्भुवधूपमां
स्वक्षमाजितभूरमां शुचिशीलनिर्जितजानकीम् ।
स्वप्रभाजितरोहिणीं मृदुवाग्जितामरभारतीं
क्षीरसागरकन्यकामिव सर्वलोकमनोरमाम् ॥ ११ ॥

मक्षिकामधुमक्षिकानुपभुक्तपुष्परसोपमां
चन्द्रबिंबमिवाकलङ्कमतां वपावनविग्रहाम् ।
पुण्यसंचयसत्फलप्रिययौवनोदयसंभ्रमां
कांक्षते स्म मनःप्रियां बसवोऽपि लोकहिते रतः ॥ १२ ॥

चचलेन्द्रियसंयुतोऽपि नरः स्वकीयकलत्रवान्
नेक्षते परदारसंघमुदारधीरबलागणम् ।
सत्कलत्रमथेह मानवमंगलाय परत्र च
यत्र मानवहृस्तियन्त्रणशक्तिरात्मसती प्रिया ॥ १३ ॥

बन्धनं परदारभोगरतेः स्वकीय कुलस्त्रियः
भुक्तिभाजनतामुपैति नरो हरप्रियनिष्ठया ।
एतदेव विचार्य साधुरुवाच मन्त्रिणमुत्तमं
स्वानुकूलकलत्रमीप्सितमद्य मे जनकोत्तम ॥ १४ ॥

चातको रमते यथा घनदर्शनेन तृषाकुलः
सच्चकोरगणो निशाकरदर्शनेन यथाकुलः ।
राजहसगणः सरोरुहदर्शनेन बुभुक्षितः
शम्भुभक्तवचो निशम्य विशालधीः रमते तथा ॥ १५ ॥

हर्षपूर्णमना गनोहरमात्मजामणिभाजनं
सोदरीतनयं स्मिताननमुन्नताङ्कुतदर्शनम् ।
भाषते स्वयमात्मजाहितमात्मशचित्तसमुज्जलं
स्वागतं भवतो मदीयपुरे पुरारिपराक्रम ॥ १६ ॥

मन्त्रिपुङ्गवनिर्गमे बसवोऽपि निश्चलमानसः
सोदरीसहितो हितैषियुतश्च मङ्गलकांक्षया ।
प्रस्थितः प्रति पट्टणं बलदेवमन्त्रिसुपालितं
लौकिकं परमार्थसाधनमुत्तमं सुजनप्रियम् ॥ १७ ॥

सज्जनं सचिवोत्तमाप्तमुदारचित्तमनामयं
सेनया सहितं हितैषिगणावृतं बसवप्रभुः ।
नागमाख्यसहोदरीसहितः स्मितास्यशशिप्रभः
अन्वगच्छति भास्करो दिवसागमेऽरुणसारथिम् ॥ १८ ॥

मार्गमध्यविरामतुष्टमनाः मनस्विजनादृतः
तत्र तत्र जलाशयोदकपानसम्भ्रममानसः ।
सर्वतोऽपि निसर्गसुन्दरदर्शनातिमुदान्वित-
स्छायया द्रुमजातया हतसूर्यतापभयोऽभवत् ॥ १९ ॥

मन्दमारुतसेवितो यदि पुष्पगन्धशुभोदयः
शीतवारिविहारमोदरतो विनोदिगुणान्वितो ।
श्रान्तिहारिसुखासनः प्रियभाषणो मधुराशनः
दीर्घपर्यटनं भवेत् सुखवर्धनम् श्रमवर्जितम् ॥ २० ॥

नर्तनं विपिने मयूरगणस्य कोकिलकूजितं
गर्जितं गजराजमुख्यवनेचरोदयमद्भुतम् ।
क्रीडनं मधुरं मरालगणस्य षट्पदगुञ्जनं
हर्षमेति सुसंस्कृतं हृदयं समीक्ष्य विराजितम् ॥ २१ ॥

दैवदत्तमिदं निरामयमक्षियुग्ममिहास्ति चेद्
दर्शनीयमुदारदर्शनमात्मतोषकरं जनैः ।
कर्णयुग्ममनामयं श्रवणैकसाधनमस्ति चेत्
श्रूयतां रसिकैर्ध्वनिर्ननु मञ्जुलो गिरिकानने ॥ २२ ॥

ईशनिर्मितिकौशलं च समीक्ष्य विस्मितमानसो
मानुषो शिवभक्तिपूर्णमनाः सुनिर्मलभावनः ।
अल्पशक्तिरथाभिमानविहीनतात्मरतोऽमलः
आत्मशक्त्यभिवृद्धिलालसमानसो भुविपावनः ॥ २३ ॥

अग्रणी बलशालिनां समदो गजेन्द्रगणाधिपः
तद्धतेभनवीनरक्तपिपासितो हरिणाधिपः ।
मानवोऽल्पबलोपि तद्बलशालिनिग्रहणक्षमः
यस्य बुद्धिबलं भवेद्भुवनेऽधिकोऽस्य पराक्रमः ॥ २४ ॥

आत्मशक्तियुतः पराक्रमशालिनामधिकः क्षमः
विश्वपालनतत्परेशकृपावशान्मनुजोऽ समः ।
एवमेव विचारयन् बसवो निसर्गमनोज्ञता-
स्वादतत्परमानसो शिवभक्तिपूर्णमनोरथः ॥ २५ ॥

यस्य कस्यचिदेव निर्मलमानसं शिवसत्कृपा-
भाजनं क्षितिभूषणं सकलेन्दुबिम्बसुखप्रदम् ।
राजते भुवने यशोऽस्य सुनिर्मलं भुवनाधिकं
जन्म तत्सफलं भवेन्मनुजस्य लोकहितैषिणः ॥ २६ ॥

यस्य वै शिवनामकीर्तनपावितं मुखमन्दिरं
ईशसृष्टिनिरीक्षणात्कृतमक्षियुग्ममनामयम् ।
ईश्वराद्भुतलीलया सरलं मनो मुदितं यथा
लोकवन्दितजीवनः स भवेद् गिरीशसमप्रभः ॥ २७ ॥

यक्षराक्षसदानवादिगणस्तुतं गिरिजाधवं
आगमादि पवित्रसत्कृतिकीर्तितं करुणालयम् ।
लोकपालनमुख्यकर्मरतं विरक्तमुमाधवं
कीर्तयन् बसवप्रभुः ससुखं प्रवासरतोऽभवत् ॥ २८ ॥

पट्टणं नृपबिज्जलोदयकारणं नगराधिपम्
तैः पुनर्बलदेवमन्त्रिवचो निशम्य तदाज्ञया ।
सेवकैः स्वयमुत्सुकैर्विविधप्रकारविभूषितै-
श्चेतसा मुदितेन मण्डितमद्य तन्मृदुभाषणैः ॥ २९ ॥

मण्डितं विविधप्रसूनगणेन सद्गुणभूषितैः
रत्नकांस्यसुवर्णमौक्तिकरम्यदर्शनमद्भुतम् ।
तोरणैश्च मनोहरैरतिथिप्रियैः प्रियदर्शनैः
नूत्नमेव विराजते पुरमिन्द्रगुप्तमिवापरम् ॥ ३० ॥

राजते गृहमण्डलं प्रतिवीथ्यलंकृतिनूतनं
तत्प्रजागण उत्सवैकरतो विवाहदिनाकुलः ।
वेषभूषणतत्परः सचिवात्मजाहितकामनः
सर्वतोऽपि विराजते नगरं गजेन्द्रगणाकुलम् ॥ ३१ ॥

हर्षपूर्णमनास्तदा जनताहि पुण्य शुभोदये
गायनादिकलाविलासरतिः स्वयं सचिवालये ।
नेत्रजालमनालसं शुभदर्शनातिफलागमं
दूरतोऽपि समागताः पुरुषा विवाहदिदृक्षया ॥ ३२ ॥

यन्नगाधिपतिः शिवाय विवाहसम्भ्रममानसः
स्वागतं बहुमानपूर्वकमातनोति हिमालयः ।
तच्चकार तनूद्भवात्महिताय मन्त्रिधुरन्धरः
शम्भुभक्तवराय तद्वसवेश्वराय निजालये ॥ ३३ ॥

अर्घ्यपाद्यविधानतत्परमानसः स्वयमादरात्
सत्करोति निजालये ह्युचितासने बसवेश्वरम् ।
सेवकेषु चरत्सु सद्विनयेषु वै सचिवोत्तमः
सम्भ्रमो गृहमागतेऽतिथिपुंगवे गृहमेधिनाम् ॥ ३४ ॥

मङ्गलोत्तमभूषणो मृदुभाषणो बसवेश्वरः
भस्मलिप्तकलेवरोन्नतमस्तकोऽद्भुतदर्शनः ।
सा पुनःसचिवात्मजाऽ मलवस्त्रभूषणधारिणी
पार्वतीव शिवान्तिके शुशुभे विवाहमहोत्सवे ॥ ३५ ॥

यत्पुरं भुवानादृतं नगरान्तराधिकमंजुलं
तत्पुरे बसवेशपुण्यविवाहसंभ्रमसंभवः ।
नेदृशं भुवनत्रये नयनाद्भुतं ह्यभवत्पुरा
नो भविष्यति नास्ति वा जननेत्रयोः शशिमण्डलम् ॥ ३६ ॥

तोषमेति विवाहमंगलदर्शनाज्जनको यथा
आगतं शिवभक्तपुंगवमण्डलं सकलं तथा ।
वीरशैवमतोऽधिकं भुवनादृतं शुभदर्शनं
सन्मनोरथपूरणान्मुदितं मनोऽभयकारणम् ॥ ३७ ॥

पुष्पवृष्टिरभूत्तदा शुभदर्शना गगनांगणाद्
देवदुन्दुभिनादपूर्णमभूत्तदा भुवनाङ्गणम् ।
स्वार्थसाधनतत्परा भुवि धर्मजीविकया हृता
दुःखभाजनतां ययुः पुरुषाः कुरीतिनयान्विताः ॥ ३८ ॥

धन्यतां बलदेवमन्त्रिधुरन्धरो धरणीतले
स्वात्मजाद्भुतमङ्गलोत्सवतुष्टिरास हृदम्बुजे ।
धर्मसाधनमुत्तमं ननु मङ्गलोत्सवपूरणं
तोषमेति सदाशिवः शरणस्य दारपरिग्रहात् ॥ ३९ ॥

(वसन्ततिलकवृत्तम्)

गंगाम्बिकापरिणयाद् बसवः प्रसन्नः
धन्या चसा बसवपुंगवलाभतृप्ता ।
गंगाम्बिकाजनयिता जननी च धन्यौ
धन्या समस्तजनताद्भुत दर्शनेन ॥ ४० ॥

इति शिवकवि डॉ. परड्डी मल्लिकार्जुन विरचिते
'बसवभास्करोदये' काव्ये 'गंगाम्बिकापरिणयो'
नाम पंचम सर्गः ।

षष्ठः सर्गः

(अनुष्टुभ्)

समाप्तेऽथ विवाहान्तसमारम्भे समागतान् ।
आमन्त्र्य बसवो भूपः गुरुदर्शनकांक्षया ॥ १ ॥

सोदरीसहितः पत्नीसमेतश्च गतव्यथः ।
जगाम संगमावासं कैलासमिव भूगतम् ॥ २ ॥

देशभाषासमाख्यातं कूडलेलि समाख्यया ।
संगमेशस्थलं प्राप सत्वरः परिवारवान् ॥ ३ ॥

दृष्ट्वा तद् गौरवोपेतं क्षेत्रं स्वगुरुपावितम् ।
सांजलिः सुखनेत्राम्बुप्लावितास्यो गतस्मयः ॥ ४ ॥

त एव पादपच्छायाः फलपुष्पसमन्विताः ।
त एव विटपाश्चित्रा लता कुसुमभूषिताः ॥ ५ ॥

वापीकूपतडागाद्या निर्मला जलराशयः ।
पशवो धेनुमुख्यास्ते ता एव वनराजयः ॥ ६ ॥

पुनरागत्य तान् सर्वान् दृष्टचा निश्चलतारया ।
दृष्टुमारभते प्रीत्या नवानिब मधावमून् ॥ ७ ॥

आगतं बसवं दृष्ट्वा तरुगुल्मलतादयः ।
आह्वयन्तीव ते प्रीत्या विटपैर्वायुनेरितैः ॥ ८ ॥

धेनुवत्साः समीक्ष्यैनं बसवं करुणानिधिम् ।
समायान्ति समीपस्थं लालितास्तेन ते पुरा ॥ ९ ॥

सहपाठिगणः सर्वः सोदरस्निग्धमानसः ।
सानुरागं समायाति कल्पवृक्षमिवासमम् ॥ १० ॥

आनन्दाश्चर्यमग्नेन बसवेन निरूपितम् ।
तपोवनं समारब्धमहोत्सवमिवातुलम् ॥ ११ ॥

संभाव्य तरुशाखादीन् आलिंग्य धेनुवत्सकान् ।
प्रीणयित्वान्यमित्रादीन् बसवो मधुराक्षरः ॥ १२ ॥

ये पूर्वं पालितास्तेन सदयं मृगशावकाः ।
प्रीणयन्ति त एवाद्य तरुणा बसवप्रभुम् ॥ १३ ॥

जानन् सर्वमिदं वृत्तं बसवागमनसंश्रयम् ।
तदाश्रमरतिं चैव सस्मितोऽपि गताव्यथः ॥ १४ ॥

जातवेदमुनिः स्वीयकुटीरे ज्ञाननिर्मले ।
धेनुर्वात्सल्ययुक्तेव शिष्यसंगमलालसः ॥ १५ ॥

बसवेशं समायातं सोदरीदारसंगतम् ।
वैराग्यभक्तिसंयुक्तं ज्ञानं मूर्तमिवैक्षत ॥ १६ ॥

ज्ञानवान् विनयोपेतः रूपवान् गुणसंयुतः ।
निःस्पृहश्चार्थशास्त्रज्ञो दृष्टो लोकविलक्षणः ॥ १७ ॥

समायातं समानीय भक्तं मुक्तिप्रदः स्वयम् ।
निर्निमेषदृशा तुष्टो दृष्ट्वाचार्यश्च निर्भयम् ॥ १८ ॥

सदैव हि सदाचारसद्भक्तिज्ञानसंगमः ।
कोऽन्योभुवि लभ्येत बसवात् शिष्यसत्तमात् ॥ १९ ॥

एवं विचिन्त्य सन्तुष्टमानसो गुरुसत्तमः ।
स्वयमुत्थाय सम्भ्रान्तशिष्यालिंगनतत्परः ॥ २० ॥

नमन्तमुन्नताचारं मलत्रयविनाशनम् ।
गुरुदेवं गुरुर्देवो मूर्ध्नि जिघ्राय मोदते ॥ २१ ॥

त्वदागमनसंतुष्टो मदन्यः कः कृती क्षितौ ।
त्वत्त इच्छामि सच्छिष्याद् विश्वबन्धो
पराजयम् ॥ २२ ॥

विवाहदीक्षितो यस्मात् शिवदीक्षाशुचिव्रतः ।
वीरशैवमतं लोके प्रचारयितुमर्हसि ॥ २३ ॥

सदाध्ययनशीलोऽपि लौकिकज्ञो विचक्षणः ।
भ्रान्ते बहुमतध्वान्ते लोके त्वं मार्गदर्शकः ॥ २४ ॥

शिवागमादिसद्ग्रन्थनिरूपितमिदं पुरा ।
काललीलाखिलीभूतं वीरशैवमतं परम् ॥ २५ ॥

परिष्कृत्य शिवाधिक्यं भूतले ख्यापयिष्यसि ।
विचाराचारक्रान्त्या त्वं विश्वबन्धुर्भविष्यसि ॥ २६ ॥

इष्टलिङ्गाख्यविश्वेशं देहदेवालये नरः ।
अर्चयित्वा तु तन्निष्ठो मोक्षलक्ष्मीवरः परः ॥ २७ ॥

शिवभक्त्यमलो देही लिंगलीनमनःस्थितिः ।
गुर्वादिपादपानीयं प्रसादं लभते सुधीः ॥ २८ ॥

गुरुलिंगचरानीशस्वरूपानर्चयन् कृती ।
ईशावास्यमिदं मत्वा मोदते भुवनत्रयम् ॥ २९ ॥

सत्यशुद्धक्रियाशक्तिः शिवपूजापरो यतः ।
तन्निष्ठशिवकारुण्यात् प्रसादभाजनं ततः ॥ ३० ॥

शिवदीक्षापवित्रात्मा वर्णाश्रमरतिं त्यजेत् ।
नदीनां बहुरूपाणां सागरे चैकरूपता ॥ ३१ ॥

बहुद्रव्यव्ययीभावे यज्ञादिधर्मसम्भवः ।
धर्मोपजीविभिर्गुप्तं स्थावरं शिवमन्दिरम् ॥ ३२ ॥

प्राणिहिंसापि वेदोक्तकर्मणि प्रभुसम्मिते ।
मृदुसत्त्वगुणोपेतो हिंसारक्तमना यतिः ॥ ३३ ॥

सत्कार्यनिरताः सर्वे मानवा भुवनालये ।
देवलोकं यतः कुर्युः कुतो वान्यशिवालयः ॥ ३४ ॥

अष्टावरणसम्पन्नो पंचाचारपरायणः ।
षट्स्थलज्ञानसम्पूर्णः स भवेन्मुक्तिभाजनम् ॥ ३५ ॥

भुवनं भवनं मत्वा शिवभक्तान्स्वबान्धवान् ।
उमेशौ पितरौ धन्यो वीरशैवकुलोद्भवः ॥ ३६ ॥

सर्वेषां यदि विश्वात्मा हृदयेषु प्रतिष्ठितः ।
विनष्टममकारस्य लिंगभेदो भवेत्कुतः ॥ ३७ ॥

मोक्षस्य मूलहेतुत्वाल्लिंगलीलाविलासतः ।
पंचमः पुरुषार्थो हि भक्तिरित्यभिधीयते ॥ ३८ ॥

तदेतद् वीरशैवस्य स्वरूपं तु समासतः ।
विश्वमान्यं भवेद् वत्स साधनासुलभं यतः ॥ ३९ ॥

प्रामाण्यमागमादीनां पुराणकथनं पुनः ।
चानुभावं समाश्रित्य मतोद्धारक्षमो भव ॥ ४० ॥

पारलौकिकविज्ञानं मुमुक्षुगणभूषणम् ।
लौकिकं चापि साधूनां लोकसंग्रहकारणम् ॥ ४१ ॥

नानास्वभावसम्पन्नाः समाजे पुरुषा यतः ।
तैः सहैव त्वया वासः कर्तव्यः स्थिरचेतसा ॥ ४२ ॥

ये चापि सुखिनो लोके वर्तन्ते शुभकामनाः ।
तैः सदा मित्रता कार्या मात्सर्यविमुखात्मना ॥ ४३ ॥

दारिद्र्यदुःखसन्तप्ता भुवि ये दीनमानसाः ।
करुणा तेषु कर्तव्या सदैवामिततेजसा ॥ ४४ ॥

सद्गुणग्रामसंपन्नं नरं पुण्यक्रियान्वितम् ।
वीक्ष्य सन्तोषमतुलं लभस्व शिवसंमतम् ॥ ४५ ॥

पापिनो वैभवोपेताः लब्धमानाः स्मयस्मिताः ।
उपेक्षितव्या नीतिज्ञ भवता विमलात्मना ॥ ४६ ॥

आत्मवत् पश्य सर्वाणि भूतानि शिवभावनः ।
शिवाद्वैतपरो नित्यं विश्वमंगलकामनः ॥ ४७ ॥

परदारेषु कर्तव्या मातृबुद्धिः भवप्रिया ।
मानवेषु च सर्वेषु मित्रबुद्धिः शिवाज्ञया ॥ ४८ ॥

विविधदेवतासक्तान् नीतियुक्तान् हितैषिणः ।
शिवभक्तधिया नित्यं मानयात्मपरायणः ॥ ४९ ॥

परद्रव्यं सुलभ्यं यत् तदेतत् परिवर्जय ।
सत्यशुद्धक्रियाहीनो न चरानपि भोजय ॥ ५० ॥

जितक्रोधरयः शत्रुमित्रवर्गसमानधीः ।
मानापमानयोस्तुल्यो भव [illegible]स विशाल[illegible]ीः ॥ ५१ ॥

(शार्दूलविक्रीडितवृत्तम्)

विद्यासागर सर्वमेव भवतो विज्ञातपूर्वं यतः ।
लोकेऽस्मिन्नुपदेश्यमस्ति न पुनर्लोकोपकारक्षमम् ॥
श्रीशैवागमसारभूतमखिलं प्रोक्तं मयान्यादृशं ।
शिष्यप्रीतिविवर्धनं भवतु तल्लोकोत्तरं
निर्भयम् ॥ ५२ ॥

इति शिवकवि डॉ. परड्डी मल्लिकार्जुन कृते
बसवभास्करोदये महाकाव्य 'संगमक्षेत्रपुनरागमनं'
नाम षष्ठः सर्गः ।

सप्तमः सर्गः

(विबुधप्रियावृत्तम्)

श्रीशिवागमसारभूतमुदारतत्त्वगुणादृतं
श्रीगुरोर्मुखतो विदित्वा वन्दते बसवेश्वरः ।
इष्टलिंगसमर्चनं शिवमन्त्रपूतकलेवरः
भुक्तिमुक्तिफलप्रदं कुरुते जनैरभिवन्दितः ॥ १ ॥

प्रातरेव समुत्थितः शिवपूजनैकदृढव्रतः
पत्रपुष्पचयं नवीनतमं समीक्ष्य समाहरन् ।
भूतिभूषितमास्यगौरवभाजनंसुसमाहितः
इष्टलिंगनिरुद्धचेतसि शान्तिरात्मबलान्तिः ॥ २ ॥

श्रीविभूतिशिवाक्षिभूषितभालकण्ठ उदारधीः
इष्टलिङ्गधरो धरातलमण्डनं महिमामयः ।
भस्मलेपनपावितः शिवमन्त्रपूतनिजाननः
राजते जननेत्रतोषकरः शिवार्चनतत्परः ॥ ३ ॥

शुभ्रवस्त्रधरः स्मिताननशोभितो शिवलांछनः
याति यत्र मिताशनो मितभाषिणो मितभूषणः ।
तत्र तत्र शिवालयो बहुजन्मपुण्यफलोदयः
राजते बसवः प्रभुः पुनराश्रमे सुजनप्रिये ॥ ४ ॥

स द्वितीय शिवाख्यया प्रथितः शिवाधिकसम्मतः
शांभवव्रतधारणाद् धरणीतले शुभदर्शनः ।
पश्यति स्म जनं च यं बहुजन्मपुण्यफलान्वितं
मोक्षभाजनतां नयत्यनुरागपूर्णसुवीक्षणः ॥ ५ ॥

चन्द्रबिम्बनिभाननो रविबिंबकान्तिसमन्वितः
दीनलोककृते मृदुः सदयः कुमार्गिहुताशनः ।
साधुलोकसुहृद्वरो कुजनद्विषत् शिवशासनात्
द्वन्द्ववृत्तिमुपैति लोकविचक्षणो गुरुबोधितः ॥ ६ ॥

लोकवृत्तमुदारदर्शनसम्मतं तु यथा भवेद्
भोगमोक्षकरं सुसज्जनसेवितं गिरिशप्रियम् ।
चिन्तयन्निति नित्यमागमबोधपूर्णमनाः स्वयम्
जातवेदमुनिः प्रभावविशालधीरभयोऽभवत् ॥ ७ ॥

कर्मकाण्डविरोधिभावनयापि वेदरतो यतः
श्रीशिवागमतत्त्वहृष्टमनाः प्रणष्टमनोभवः ।
वीरशैवमतं जनोदयकारणं हृतविभ्रमं
बोधयन् भुवि भासते बसवेश्वरो गुरुसम्मतः ॥ ८ ॥

सद्गुरोः परमाश्रमे भुवनोत्तमे करुणालये
वर्धितोऽखिलवेदशास्त्रशिवागमामृतवारिणा ।
भक्तलोकहितंकरवतमनःफलोदयकारिणा
कल्पवृक्ष इवामलस्त्रिमलप्रणाशसुदर्शनः ॥ ९ ॥

वर्णपाशविमोचनं धनिकप्रभावनिवारणं
साक्षराधमराक्षसादिविनाशनं मितभाषणम् ।
धर्मजीविपरोपजीवनवारणं बसवप्रभुः
कर्तुमैच्छदतोऽभयो भुवि सर्वतो भयनाशनम् ॥ १० ॥

यत्तु भाविनि लोकसंग्रहकर्मणि पृथिवीतले
कार्यमस्ति शिवाज्ञया शिवभक्तवृन्दशिरोमणिः ।
तस्य चिन्तनमाश्रमे कृतवानलंकृतभूषणः
येन जातमिदं ततो भुवनं त्रिविष्टपसंनिभम् ॥ ११ ॥

गंगया निजभार्यया निजसोदरीबलसंगमात्
सर्वथा ह्यनुमोदितो शिवभक्तिनम्रधिया पुनः ।
धर्मदर्शनलोकसंग्रहकर्मशक्तिसमन्वयाद्
दीनलोकसमुन्नतेः करणं च विस्मयकारणम् ॥ १२ ॥

तत्र बिज्जलमुख्यमंत्रिविनाशतो पुरमुत्तमं
शोकपूर्णमभूत् प्रजा विगताश्रया गतचेतना ।
सव्यथो नृपतिस्तदा भुवि मन्त्रशक्तिविनाशतः
वीतभीतिरभूद्गणो द्विषतां च पूर्णमनोरथः ॥ १३ ॥

कोऽपि वा बलदेवमन्त्रिसमानलोकसमाश्रयः
राजनीतिविदां वरो स्ववशेन्द्रियो गतविभ्रमः ।
तत्समागमनं भवेदविलंबितं जनरंजनं
येन राज्यमिदं मदीयमुदारलोकसमन्वितम् ॥ १४ ॥

एवमुक्तवति स्वयं नृपतौ प्रजाहितकांक्षया
केचिदेव सभासदो बसवप्रभावविदोऽ वदन् ।
भागिनेय उदारधीर्बलदेवमन्त्रिवरस्य यः
तद्विशिष्टगुणोऽस्ति कूडलसंगमे सह भार्यया ॥ १५ ॥

भूपतिर्बलदेवमन्त्रिविनाशशोकहतो यतः
एतदेव वचो निशम्य स मोदते गतविभ्रमः ।
तस्य संगमवासिनो बसवस्य चागमनं प्रति
सत्समागमवांछयोत्सुकमानसोऽद्य ससंभ्रमः ॥ १६ ॥

स्वागतं प्रभुरैच्छदद्भुतमात्मवैभवसूचकं
येन चाखिलसत्प्रजा अवनीपतेरनुशासनात् ।
पट्टणालंकरणमग्नमनोरथा बहुरोचका
वेषभूषण धारणाद् धरणीतलामरसंनिभाः ॥ १७ ॥

तद्गृहाण्यतिरंजितान्यभवन् नवानि पुरोत्तमे
वृद्धभावसुपीडिता अपि संभ्रमास्तरुणायिताः ।
बालभावचला महोत्सवसंभ्रमा लघुचेतसः
कार्यतप्तरमानसास्तरुणाः शुभागमनोत्सुकाः ॥ १८ ॥

शम्भुभक्तधुरन्धरं बसवेश्वरं प्रभुसंमतं
द्रष्टुमुत्सुकमानसाः नगरे सुरेन्द्रपुरोपमे ।
बालकाः युवकाः स्त्रियः स्थविराश्च हर्षभरातुराः
पार्श्वयोरुभयोश्च राजपथस्य तस्थुरभीरवः ॥ १९ ॥

वन्दिमागधगीतपूर्णमिदं पुरं परमोदयं
गीतवाद्यनिनादपूर्णमनोहरं विबुधप्रियम् ।
नृत्यतत्परसत्प्रजागणरंजितं शुभदर्शनम्
राजते नगरान्तराधिकवैभवं बसवागमे ॥ २० ॥

आगते बसवे शिवाधिकतेजसातिविराजिते
राजचोदितसद्भटैर्बहुमानन्म्रशुभाननैः ।
संगते गतविभ्रमे सभयं प्रजा हितकारिणी
फुल्लनीरजराजितं हि कृतस्मितं च नृपाननम् ॥ २१ ॥

चन्द्रदर्शनतुष्टिमेति यथा चकोरगणोऽभयः
फुल्लपुष्पविलोकनात् समदो यथा भ्रमरावलिः ।
चातकस्तृषितश्च नीरददर्शनाप्तसुखःस्वयं
बिज्जलो बसवेशदर्शनतस्तथा मुदितोज्वलः ॥ २२ ॥

वीरशैवमतानुगोऽपि विशालधीर्बसवेश्वरः
भिन्नदर्शनधर्ममार्गरताः प्रजाः समदर्शनः ।
पालयन् विनयान्वितो विनयेन चात्मबलान्वितः
सर्वथा मम पुण्यपाकवशादमात्यपदान्वितः ॥ २३ ॥

बिज्जलो बसवेशलाभमुदान्वितो मदनान्तकं
मन्यते भुवनावतीर्णमतीवदैविकतेजसम् ।
स्वागतोत्सुकमानसो बलदेवनाशहताशया
अश्रुपूर्णविलोचनं सचिवोत्तमागमनप्रियं ॥ २४ ॥

तदानीं नरेशो गिरीशप्रभावं
निरीक्ष्य प्रमोदाद् विशिष्टातिगर्वः ।
पुरेऽसज्जनानां मनस्तापहेतुः
समस्तेश्वरोऽभून् मनस्तोषहेतुः ॥ २५ ॥

इति शिवकवि डॉ. परड्डी मल्लिकार्जुन कृते
'बसव भास्करोदये' महाकाव्ये 'बसवामात्यपदोदयः'
नाम सप्तमः सर्गः ।

अष्टमः सर्गः

(भुजङ्गप्रयातवृत्तम् ।)

गिरीशप्रभावं प्रभापूर्णगात्रं
निरीक्ष्य स्वराज्ये प्रजा मंत्रिवर्यम् ।
ननन्दुश्च वन्द्यं तडिद्वत्सुमेघं
सकाले सनादं यथा तीर्थपूर्णम् ॥ १ ॥

कुतो दुर्जनानां भयं भूरिबाधं
कुतः सज्जनानां क्षतिर्वानतिर्वा ।
कुतो दुर्बलानां तिरस्कारवार्ता
सुशीले च तस्मिन् अमात्ये पदस्थे ॥ २ ॥

स्वपत्नीपितुर्यत् पुराणं सुरम्यं
विशालं च सौधं तदा शून्यमासीत् ।
सदारः सबन्धुर्मुदा तत्र वासं
करोति स्म गंगाम्मनस्तोषहेतुः ॥ ३ ॥

शिवन्यस्तचित्तश्चरन्यस्तवित्तो
गुरुन्यस्तकायः प्रशाध्वस्तमायः ।
प्रियासंगतुष्टः शिवानन्दपुष्टः
प्रजारंजने यः सदादत्तचित्तः ॥ ४ ॥

कदाचित् सभायां नृपालंकृतायां
समन्त्रीश्वरायां बुधैर्भूषतायाम् ।
पपातांतरिक्षान्महीभुक्समक्षं
क्वचिद् भूजपत्रं त्रुटद्वर्णपूर्णम् ॥ ५ ॥

लिपिज्ञैः समस्तैः वृथायासपूर्णैः
अशक्यं तदासीदभिज्ञातुमेतत् ।
गणेशः कुमारः सविष्णुः सुरेशः
पठेदर्थपूर्णः वयं लेशतो वा ॥ ६ ॥

असामर्थ्यमेषां बुधानां समेषां
समीक्ष्याभवद् भूपतिः क्लेशपूर्णः ।
शिवप्रेषितं यत् प्रजानन्दहेतुं
न कोऽपि प्रभावी पठेत् किं करोमि ॥ ७ ॥

सचिन्ते सबाधे प्रजानां च नाथे
शिवन्यस्तचिन्तः प्रजानां हितैषी ।
समन्त्रीश्वरोऽभूत् प्रजानाथनाथः
लिपिज्ञानधन्यो बुधाग्रैस्समान्यः ॥ ८ ॥

उवाच प्रभुं सस्मितं हर्षपूर्णः
शिवोक्तं त्वदिष्टं प्रजानन्दहेतुम् ।
त्वदीयं सुभाग्यं श्रुणुष्व प्रमोदात्
धनं गर्तपूर्णं त्वदीयासनाधः ॥ ९ ॥

परीक्ष्यं त्वयैतन्मयोक्तं नरेश
शिवाज्ञाकरोऽहं न चेत् किंकरोऽहम् ।
शिवानुग्रहस्ते यथैष: प्रभावी
तथा कस्यचिद् वा न भूतो न भावी ॥ १० ॥

यदा गर्तभेदः कृतः सेवकैस्तै-
स्तदाविस्मयोऽभून्नृपालादिचित्ते ।
यथा भूर्जपत्रोदितं भूरिवित्तं
ततोऽपि प्रभूतं धनं हेमयुक्तम् ॥ ११ ॥

तदा बिज्जलो भूपतिर्ह्यद्वितीयं
शिवं भूमितीर्णं यतोवाद्वितीयम् ।
महानन्दपूर्णः शिवानन्दपूर्णं
बभाषेऽल्पसत्त्वो विशालप्रभावम् ॥ १२ ॥

भवत्प्रीतिपात्रं यथाहं महात्मन्
तथा कोऽपि नास्ति प्रभुर्भूतलेऽस्मिन् ।
सदा मामव त्वं तथा लोकचन्द्र
प्रजानां यथाहं करिष्ये च भद्रम् ॥ १३ ॥

मया च प्रजानां विभूत्यर्थमेषो
भवानद्य सम्प्रेषितोऽस्मत्सकाशम् ।
त्वदीयः सखाऽहं नराणामधीशः
शिवानुग्रहो मे भवत्प्राप्तिरूपः ॥ १४ ॥

यथा देवमध्ये शिवो राजमानः
यथा देववृक्षेषु चः कल्पवृक्षः ।
यथा पर्वतेषु प्रसिद्धः सुमेरुः
तथा मन्त्रिवृन्दे भवानद्य मान्यः ॥ १५ ॥

यथा कामधेनुर्गवामग्रगण्या
यथा सिन्धुमध्ये प्रसिद्धा च गंगा ।
यथा रत्नमध्ये मणिः कौस्तुभाख्यः
तथा मन्त्रिमध्ये भवानग्रगण्यः ॥ १६ ॥

त्वदायत्तमेतन्मदीयं च सत्त्वं
मदीयं सुराज्यं त्वदीयं समृद्धं ।
तवाधीनवृत्तिर्जनः साधुवृत्तः
तवानुग्रहान्मे न किंचिद् विरुद्धम् ॥ १७ ॥

तदामात्यमुख्यः शिवज्ञानसिन्धुः
बभाषे नृपालं सदाचारबन्धुः ।
स विश्वैकरक्षाप्रवीणोऽप्यनाथ-ः
सुरक्षां करोति प्रभुर्लोकनाथः ॥ १८ ॥

यथा सिन्धुमन्थागतक्ष्वेडमुग्रं
जगद्रक्षणार्थं पपौ नीलकण्ठः ।
तथा त्वत्प्रजानां अलंकर्तुमीशो
हितं मा भवेत्त्वन्मनस्तापक्लेशः ॥ १९ ॥

वचा तेन तुष्टो नृपालः प्रसन्नः
बहूदारचित्तः पुरस्कारपात्रम् ।
अमात्यं गुणाढ्यं धनाढ्यश्च: मत्वा
समाराधयन् तं मुदं प्राप पूर्णाम् ॥ २० ॥

ततो भूपदत्तां सपर्याममात्य-
वरेण्यः प्रतीक्षन् नृपं तुष्टचित्तम् ।
चकारात्मनिष्ठः प्रतिज्ञापरोऽभूत्
सदाशम्भुपूजा समस्ताः क्रिया मे ॥ २१ ॥

शिवाधिक्यमुक्त्वा शिवानन्यभावं
सदाशम्भुभक्तं नतोऽस्मि प्रकाशम् ।
शिवादेशपूर्त्यै यतिष्ये प्रभावात्
सदैवाक्षरो मे शिवानन्दकोशः ॥ २२ ॥

प्रजानां हिताय प्रभूतं धनं यद्
नृपालस्य कोशे सुगुप्तं पवित्रम् ।
न वा क्षीयतेऽस्मत्कृते कश्चिदंशः
यदि स्वार्थनिष्ठो भवेयं नृशंसः ॥ २३ ॥

न मे शम्भुभक्तैः कदापि स्वतंत्रैः
क्रियाहीनवृत्तिः समाश्रीयते तैः ।
सदासत्यशुद्धक्रियामाश्रयन्ते
शिवाचारयुक्ता हतद्वंद्वतापाः ॥ २४ ॥

न कोऽपि प्रमादाद् गुरुद्रोहकारो
न वा लिङ्गधारिष्वतस्तारतम्यम् ।
करोति स्वगेहागताथिव्रजेषु
तिरस्कारपूर्णो भवेद्भक्तिरम्यः ॥ २५ ॥

यतो लिंगधारी शुचिर्भुक्तभोगः
न वा सूतकादिभ्रमाधीनचित्तः ।
यतः सत्यशुद्धक्रियावाप्तचित्तः
सदा लोकवन्द्यः शिवानन्दयोगः ॥ २६ ॥

हरिर्वा सुरेन्द्रः प्रजानां पतिर्वा
हरो वाऽ मरो वा परित्राणहेतुः ।
गुरौ तुष्टचित्ते शिवज्ञानसिन्धौ
समस्तेन न स्यात् त्रिलोकैकबन्धुः ॥ २७ ॥

सदाव्यक्तरूपः शिवो लोकबन्धुः
गुरुर्व्यक्तरूपो दयानन्दसिन्धुः ।
चरे शम्भुरूपे तथैवेष्टलिङ्गे
गुरौ वापि भेदं कदाचिन्न कुर्याम् ॥ २८ ॥

क्रियामग्नचित्तः भवेयं यदाहं
गुरुर्जंगमश्चेत् समायाति गेहं ।
क्रियाभंगहेतुर्न मे स्यात् कदाचित्
यतः सत्यशुद्धक्रिया शम्भुपूजा ॥ २९ ॥

परस्त्रीगणो मे भवानीसमानः
परद्रव्यराशिः शिलाखण्डतुल्या ।
सदा भोगतृष्णारुचिर्नात्मनिष्ठा
प्रसादैकतुष्टिर्भवेल्लिङ्गनिष्ठा ॥ ३० ॥

शिवाचारयुक्तः कुजातिः सुबन्धुः
सदाचारपूर्णो शिवानन्दहेतुः ।
अनाचारयुक्तः कुलीनोऽपि निन्द्यः
गणाचारतुष्टो भवेदष्टमूर्तिः ॥ ३१ ॥

शिवे भक्तियोगात् प्रसन्ने कदाचिद्
धनं वा सूवर्णं न याचेऽत्र किंचित् ।
प्रसादोपभोगात् शुचिः शुद्धसत्त्वः
पठन् मंत्रराजं वृजेत् सामरस्यम् ॥ ३२ ॥

शिवद्रोहिणस्ते सदा दण्डनीयाः
दुराचारदर्पाः सदा निन्दनीयाः ।
परस्त्रीरता ये सदा तर्जनीयाः
परद्रव्यरागाः सदा वर्जनीयाः ॥ ३३ ॥

शिवः शक्तियुक्तो यथा लोकपालः
धनाढ्यः सदण्डस्तथा भूमिपालः ।
शिवाधिक्यपूजो भवेद् भक्तवर्गः
करस्थः सलीलं सदैवापवर्गः ॥ ३४ ॥

स्वधर्मे च निष्ठा भवेद्यस्य वन्द्या
परेषां मते स्यात् सहिष्णुः सदैव ।
जगत्सृष्टिकर्ता स्वतंत्रः सुदेवः
समः सानुकम्पो प्रपंचैकबन्धुः ॥ ३५ ॥

शिवः प्रार्थनीयो न यो मृत्युभीतः
मनुष्यो न देवो न वै किन्नरो वा ।
जगद्रक्षणे यः सदा दत्तचित्तः
स एव प्रभुः सज्जनानन्दहेतुः ॥ ३६ ॥

यतो जंगमानां गुरोर्या शिवस्य
सनिन्दापवादप्रवृत्तिप्रयोगः ।
स दण्डचश्च निन्दाकरो दुष्टचित्तः
स्थलत्यागरूपः प्रतीकारयोगः ॥ ३७ ॥

गणाचारबन्धुः शिवानन्दसिन्धुः
शिवाचारपूर्णो जरामृत्युतीर्णः ।
वरादिप्रसादत्रयत्यक्तदोषः
सदा निर्मलत्वात् कृतेशानतोषः ॥ ३८ ॥

यथाऽलास्यहन्ता सदाकार्यमग्नः
यथा लिङ्गधारी कृतानङ्गभङ्गः ।
कलत्रोपभोक्ता सदा ब्रम्हचारी
प्रसादोपभोक्ता निराहारयुक्तः ॥ ३९ ॥

प्रतिज्ञा यथार्था कृतार्थेन तेन
पुरस्तात्कृता सज्जनानां नतेन ।
शिवानन्दपूर्णाः ननन्दुः सुभक्ताः
तदीयप्रतिज्ञामृतास्वादसक्ताः ॥ ४० ॥

स वीरव्रती सन् प्रतिज्ञाप्रवीणः
अनुष्ठानशक्तो निजानन्दपूर्णः ।
यदीयं चरित्रं बहूदारवृत्तं
प्रवक्तुं समर्थो न कोऽपि प्रशस्तम् ॥ ४१ ॥

न भूतं न भाव्यं न वा वर्तमानं
चरित्रं तदीयं दिशासु प्रसिद्धम् ।
समाकर्ण्य कर्णामृतं साधुवृत्तः
समाकृष्टचित्तोऽन्तिकं तस्य यातः ॥ ४२ ॥

यतीनां वरेण्याः सदाचारपूर्णाः
शिवानन्दयुक्ताः परानन्दरक्ताः ।
बुधानां धुरीणाः प्रजारागपूर्णाः
नृपाला विरक्ताः स्वमोक्षैकसक्ताः ॥ ४३ ॥

धनाधिक्यसौख्यं कलत्रादिभोगं
असारं हि मत्वा प्रपंचं समस्तम् ।
शिवानन्दरूपं चिरं द्रव्यजातं
अलभ्यं हि लब्धुं समायान्ति सन्तः ॥ ४४ ॥

न वर्णादिभेदो न वाचारभेदः
तदा तेषु कश्चित् मनोबाधकोऽभूत् ।
सतां लोकसौख्ये रतानां यतीनां
कुतस्तारतम्यं समाजे सुरम्ये ॥ ४५ ॥

न ते जातिभेदं न वा लिङ्गभेदं
वयोरूपभेदं न वा कर्तुकामाः ।
अतो देशदेशान्तरायातविद्व-
द्गणा लोकपालाः धनाढ्या विलोभाः ॥ ४६ ॥

शिवस्यादिभक्तं शिवानन्दलाभं
भवाम्भोधिनाशं समालब्धुकामाः ।
प्रथस्थुः सदेगं समालब्धनाथा-
स्तदा स्वर्गतुल्याऽभवत् पट्टणाभा ॥ ४७ ॥

(वसन्ततिलकवृत्तम्)

तेषां समस्तभुवनैकनिजालयानां
कारुण्यपूर्णमनसां स्वमनोऽनुकूले ।
सम्मेलने शिवकृपाबसवोदयाभ्यां
कल्याणपट्टणमभूत् तदभूतपूर्वम् ॥ ४८ ॥

इति शिवकवि डॉ. परड्डी मल्लिकार्जुन कृते
बसवभास्करोदये महाकाव्ये बसवोत्कर्षवर्धनं
नाम अष्टमः सर्गः ।

नवमः सर्गः

(अनुष्टुभ्)

नानादेशसमायाते जनस्तोमे सुदर्शने ।
शिवभक्तसमावेशो सार्थकं तदभूत् पुरम् ॥ १ ॥

चरार्पितनिजद्रव्यं लिंगार्पितस्वमानसम् ।
कृताखिलजनानन्दं शिवं मर्त्यशरीरिणम् ॥ २ ॥

धरावतीर्णगौरीशं बसवप्रभुमद्भुतम् ।
दृष्ट्वा तोषमसामान्यं लेभिरे शरणव्रजाः ॥ ३ ॥

बसवस्याद्भुतां लीलां लोककल्याणकारिणीम् ।
लोकानामभवत्श्रुत्वा प्रफुल्लं हृदयाम्बुजम् ॥ ४ ॥

बसवेशमुमाकान्तवल्लभं हितकारिणम् ।
कल्याणनगरं लब्ध्वा सार्थकं भुवनेऽभवत् ॥ ५ ॥

नैकदेशसमायातमन्त्रिणां सुधियां गणम् ।
कलालब्धयशोराशिभूषितानां विवेकिनाम् ॥ ६ ॥

नृपाणां धनिनां चैव वेदविद्यायशस्विनाम् ।
कृषिवाणिज्यमग्नानां शरीरश्रमकारिणाम् ॥ ७ ॥

बसवेश्वरमहातीर्थस्नानपुण्याभिलाषिणाम् ।
संगतो नगरे ह्यस्मिन् वसुधैककुटुम्बवान् ॥ ८ ॥

सर्वोदयविचारोऽहि येषां रुचिरभून्नवा ।
तेऽ पि तत्रागताः सर्वे द्रष्टुं बसवभास्करम् ॥ ९ ॥

त्यक्तपूर्णाश्रमश्रेणिपदलांछनगौरवाः ।
भेदबुद्धितिरोधानप्रफुल्लहृदयाम्बुजाः ॥ १० ॥

सर्वगत्वान्महेशस्य ज्ञानारुणोदयेऽसमे ।
सर्वभूतहिते रक्ता विरक्ता लौकिकोदये ॥ ११ ॥

संयोगं शिवयोगाख्यं जीवात्मपरमात्मनोः ।
जीवन्मुक्तस्थितिं लब्धुं कातरा विमलाशयाः ॥ १२ ॥

परित्यक्तधना राज्यकोशनिःस्पृहमानसाः ।
अलौकिकशिवानन्दकोषसस्पृहमानसाः ॥ १३ ॥

त्यक्तदाराः सपत्नीकाः परित्यक्तस्वबान्धवाः ।
त्यक्तनिद्रा प्रबुद्धाश्च बसवार्कशुभोदये ॥ १४ ॥

योऽभवद् रेणुकाचार्यलिङ्गगर्भोदये पुरा ।
तोषः स एव संजातो जनानां बसवोदये ॥ १५ ॥

यथा दृक्पातधन्यास्ते रेणुकस्य महात्मनः ।
बसवेशकृपादृष्टिकांक्षिणः क्षीणकल्मषाः ॥ १६ ॥

मातृवत् परदारेषु लोष्ठवत् परकांचने ।
आत्मवत् सर्वभूतेषु पश्यन्तो गतविभ्रमाः ॥ १७ ॥

तद्वचोवारिधौता ये मानवा भुवनालयाः ।
तेषां कृते जगत्सर्वं पावनं हि शिवालयम् ॥ १८ ॥

बसवप्रभुसामीप्यं कांक्षन्तोऽत्र समागताः ।
पुण्यतः पापनाशो वा दर्शनं महतो भवेत् ॥ १९ ॥

कल्पवृक्षमिव प्राप्तं चिन्तामणिमिवासमम् ।
कामधेनुसमं सर्वे पश्यन्ति बसवेश्वरम् ॥ २० ॥

बुभुक्षापीडिता वत्सा मातृदर्शनकातराः ।
दृष्ट्वा धेनुं यथा हृष्टाः तथा ते बसवेश्वरम् ॥ २१ ॥

येऽपि तत्र समायाताः बसवेशदिदृक्षया ।
तेषु नैकोऽप्यभूद्धूर्तः परद्रव्यपरायणः ॥ २२ ॥

नैवान्यस्य पराधीनः परोपजीविनोऽथवा ।
बुद्धिपौरुषहीनो वा भवभोगपरोऽथवा ॥ २३ ॥

सत्यशुद्धक्रियाशक्तिलब्धकैलाससंपदः ।
शिवानुग्रहनिश्चिन्ताः वराकोदरपूरणे ॥ २४ ॥

स्वकर्मनिरताः सर्वे प्रसादैकफले रताः
लिंगदीक्षापरिक्षीणमलत्रयशुचिस्मिताः ॥ २५ ॥

परतापापहर्तारः खलमन्दिरनिःस्पृहाः ।
शिवभक्तमुखांभोजदर्शने बहुलस्पृहाः ॥ २६ ॥

परदैवनिरासक्ताः परद्रव्यपराङ्मुखाः ।
इष्टलिङ्गैकनिष्णाताः जङ्गमार्चनमानसाः ॥ २७ ॥

सदाचारजगद्वंद्याः लिंगाचारशुचिव्रताः ।
भृत्याचारविनीतास्ते शिवाचारनिरामयाः ॥ २८ ॥

ईशावास्यमिदं मत्वा जगत्सर्वं चराचरम् ।
शिवार्पणधियः शुद्धाः शाम्भवव्रतधारिणः ॥ २९ ॥

गुरुलिङ्गचरेष्वेकबुध्या त्रिविधसम्पदः ।
पूर्वाश्रमक्रियाचारपरित्यागपरायणाः ॥ ३० ॥

शिवाधिक्यविसंवादे बधिरा मृदुभाषणाः ।
शिवनिन्दाकरे वापि गणाचारबिभीषणाः ॥ ३१ ॥

बसवेशमहामन्त्रसर्वोदयविचक्षणाः ।
अष्टावरणसंयुक्ताः पंचाचारपरायणाः ॥ ३२ ॥

षट्स्थलाचारसम्पन्नाः एकोत्तरशतस्थलाः ।
साधनाध्यात्मवित्ताढ्याः शिवाद्वैतसमाधयः ॥ ३३ ॥

पंचाक्षरजपासक्तिनिर्धूतचित्तविभ्रमाः ।
भस्मस्नानरताश्चापि त्रिपुंड्रांकितमस्तकाः ॥ ३४ ॥

चकोराश्चन्द्रिकापानमहानन्दसमुज्वलाः ।
तथा ते शिवभक्तानां समागमसुखोदयाः ॥ ३५ ॥

शशिनो गगनांभोजमण्डनं मण्डलं यथा ।
त्रिपुण्ड्रधारणं तेषां विभूषणमनुत्तमम् ॥ ३६ ॥

सप्तकोटिमहामन्त्रमूर्धन्यो धन्यगोचरः ।
पंचाक्षरमनुस्तेषां निःश्वासः शिववल्लभः ॥ ३७ ॥

गुरुलिंगचराणां तु तनुचित्तधनार्पणम् ।
कुर्वन्ति सततं श्रद्धासमेतास्तत्र संगताः ॥ ३८ ॥

जंगमार्चननिष्णाताः सत्यशुद्धक्रियामयाः ।
वांछन्ति न परद्रव्यं तृणीकृतजगत्त्रयाः ॥ ३९ ॥

येषां तृप्तं मनः शुद्धं परिपूर्णमनोरथम् ।
सन्तोषान्नापरं द्रव्यं विद्यते भुवनत्रये ॥ ४० ॥

येषां बहुविधाश्चित्तवृत्तयोऽनन्तसंख्यकाः ।
मनःशान्तिः कुतस्तेषां कामाग्निदग्धचेतसाम् ॥ ४१ ॥

यस्य सन्तुष्टचित्तस्य परिपूर्णा मनोरथाः ।
सर्वतः सम्पदस्तस्य लोककल्याणचेतसः ॥ ४२ ॥

अतृप्ता धनसम्पत्त्या दरिद्रा एव ते नृपाः ।
औदार्यधनिनां तेषां शरणानां धनाढ्यता ॥ ४३ ॥

तन्द्रिका निन्दिता यत्र क्रियाचारपरायणैः ।
लक्ष्मीवासः सदैव स्यादिति भक्तगणोदितम् ॥ ४४ ॥

अन्यायेनार्जितं वित्तं भिक्षयार्जितमेव वा ।
चरार्पणविधौ शुद्धे शिवभक्तो न वांछति ॥ ४५ ॥

त्रिविधेन प्रसादेन सर्वपापप्रणाशनम् ।
शिवभक्तिपरा लोके प्रसादैकपरायणाः ॥ ४६ ॥

इष्टलिंगादितीर्थेन मनोसिद्धिरिति स्मृतम् ।
बीरशैवास्ततः सर्वे शिवपादाम्बुसुव्रताः ॥ ४७ ॥

मूलं वृक्षमुखं मत्वा क्षितौ यत्तोयसेचनम् ।
फलपुष्पगणप्राप्तेः कारणं श्रमवारणम् ॥ ४८ ॥

शिवलिंगमुखं नान्यद् जंगमादपरं भवेत् ।
इति यस्य भवेद्बुद्धिः स मुक्तो नात्र संशयः ॥ ४९ ॥

बसवेशप्रभुप्रोक्तं निगमागमसंमतम् ।
सदाचाररताः सर्वे श्रुत्वा श्रोत्ररसायनम् ॥ ५० ॥

(द्रुतविलम्बितवृत्तम्)

इति सदाशिवभक्तिबलान्वित-
बसवराजयशःसुरभीकृते ।
जगति भौतिकभोगपरम्परा
तदुपदेशपरैश्च विहायते ॥ ५१ ॥

इति शिवकवि डॉ. परड्डी मल्लिकार्जुन कृते
बसवभास्करोदये महाकाव्ये शिवधर्मप्रबोधनं
नाम नवमः सर्गः ।

दशमः सर्गः

(चामरवृत्तम् ।)

षट्स्थलेष्वनेकभेदकल्पना विराजते
ज्ञानशून्यमन्तिमं स्थलंशिवैक्यकारणम् ।
लिंगरूपिब्रम्ह शून्यमित्यतो ब्रुवन्ति ते
शून्यसम्पदेकलाभतुष्टिरस्ति लिंगिनाम् ॥ १ ॥

तत्प्रतीकमेकमङ्कुलं सुवर्णनिर्मितं
रत्नराशिभूषितं शुभासनं शुभोदयम् ।
निर्मितं द्वितीयशम्भुनासुना शिवागम-
ज्ञानिना तदर्हजंगमप्रतीक्षणं कृतम् ॥ २ ॥

स्वेच्छयात्रसंगतो विरागियोगिपुङ्गवः
अल्लमः प्रभुः प्रसन्नवक्त्रशोभितोऽभयः ।
ज्ञानसूर्यसोत्कटः प्रशान्तसौम्यशीतलः
भक्तकल्पभूरुहो नभःकलेवरोऽमलः ॥ ३ ॥

तं स्वयं समागतं समीक्ष्य जंगमोत्तमं
अल्लमप्रभुं विरक्तमानसं ह्यमानुषम् ।
कामदर्पदुर्णयिप्रभावनाशकारिणं
विस्मिताश्च सस्मितं तदा विकारवारणम् ॥ ४ ॥

यद्विलोभनार्थमाप्तकामिनीकलेवरा[1]
संभ्रमैककारणं विरागियोगिनिन्दिता ।
भक्तिमुक्तिवारणं च कामवृन्दवन्दिता
व्यर्थमेव नृत्यति स्म मोहजालबंधिता ॥ ५ ॥

निर्ममत्वसुप्रसिद्धपितृ[2]संभवोऽसमः
सद्गुरु[3]प्रभावलिंगलब्धशम्भुविक्रमः ।
योगशक्तिलब्धलोकसंग्रहो विशालधी-
रल्लमो प्रभावपूर्णमूर्तिरोजसः सुधीः ॥ ६ ॥

यः स्वयं शिवागमोक्तधर्मपालनाग्रणीः
ज्ञानभक्तिकर्मयोगमूर्तिरद्भुतेक्षणः ।
यः पुनः शिवप्रभाप्रसन्नधीर्निरामयः
लोकनेत्रकौमुदी निरन्तलोकसंभ्रमः ॥ ७ ॥

भस्मना त्रिपुण्ड्रधारणात् पवित्रमस्तकः
इष्टलिंग धारणादनिष्टवारणक्षमः ।
मंत्रराजलब्धशाम्भवप्रसादनिर्मलः
यत्कटाक्षपावितोऽखिलो जनः शुभोदयः ॥ ८ ॥

कामिनीकटाक्षबाणपातघातितं मनो
यस्य योगशक्तिमत् कदापि नैव बाधितम् ।
व्योमकायसिद्धिलब्धशम्भुयोगवैभवः
यः परोपकाररक्तमानसोऽतिमानवः ॥ ९ ॥

---

1) कामलतेति मायामूर्तिमती 2) निरहंकार:सुज्ञानदेवीपितरौ
3) अनिमिषयोगी

यः शिवं सदा समीक्षते समस्तजीविषु
आत्मवत्परं विचिन्तयत्यनाप्तकल्मषः ।
मातृवत् परस्त्रियं च लोष्ठवद्धनादिकं
योगिराड्विराजते विचित्रदिव्यशक्तिमान् ॥ १० ॥

लिंगलीनमानसो विचारमग्ननिश्चलः
विचित्रवेषभूषणो विरक्तिमुक्तबन्धनः ।
योगशक्तितीर्णभोगसिन्धुरात्मबन्धुरः
अल्लमप्रभुः प्रभावशालिनां धुरन्धरः ॥ ११ ॥

यः प्रसिद्धयोगशास्त्रराशिलब्धपाटवः
शम्भुभक्तियोगलब्धलिंगसंगनिर्वृतिः ।
यः शिवागमोक्तवीरशैवमार्गवर्तनः
यौवनान्धकारमुक्त मानसोऽप्यमानुषः ॥ १२ ॥

मूर्तिमान् विमुक्तदेहधर्मसंघसंभ्रमः
भक्तिबोधसत्क्रियात्रिवेणिकासमागमः ।
जीवलोकमित्रतामिभूषितो निरंकुशः
लोकनीत्ययन्त्रितः शिवागमोक्त्यलंकृतः ॥ १३ ॥

तं विलोक्य मूर्तिमन्तमीश्वरं कृपाकरं
दीनलोककल्पवृक्षमाश्रिताभयप्रदम् ।
त्यक्तभोगमाप्तयोगमिष्टमोक्षसाधनं
अल्लमप्रभुं तुतोष भक्तिनम्र शीर्षकः ॥ १४ ॥

कामधेनुवत्सदाश्रितप्रसादसाधनं
अन्धकारदुःखितैकभानुमात्मबोधनम् ।
दूरतो विलोक्य दण्डवत् प्रणम्य मंत्रिणां
यो धुरन्धरः समागमोत्सुकः ससंभ्रमः ॥ १५ ॥

पूजनं विधाय भक्तिपूर्णमानसेन वै
अल्लमप्रभोरमेयबोधसम्पदस्तथा ।
स्वागतं करोति हृष्टचेतसा सुचेतसः
दीनतादरिद्रताबधितो निधेर्यथा ॥ १६ ॥

येऽल्लमप्रभुप्रभावभक्तितः समागता
तद्विशालमण्डपे दिदृक्षवः सुबोधिताः ।
तं निरीक्ष्य पुष्करोपमं तमोविनाशनं
लेभिरे फलं स्वनेत्रयोः प्रसन्नचेतसः ॥ १७ ॥

स्वागतं च गीतवाद्यनर्तनादिसंभ्रमैः
पुष्पवृष्टिकीर्तिगानतप्तरैस्तथाकृतम् ।
रेणुकोदये च कोल्लिपाकदेशवासिभिः
स्वप्रभाविशेषदुर्निरीक्ष्यतां यथा गतम् ॥ १८ ॥

स्वास्यमण्डलोग्रतेजसाऽनिरीक्ष्यतां गतो
भक्तवृन्दचित्त चन्द्रिकामयः सदाल्लमः ।
येन तद् दिदृक्षया सचेतसः समागताः
दूरतः पिपासिताः निरुद्धचित्तवृत्तयः ॥ १९ ॥

शम्भुभक्तिसागरश्च सत्क्रियासरोवरः
यः शिवैक्यबोधमूर्तिरस्ति बोधचन्द्रमाः ।
भक्तिसत्क्रियातरंगवेगवर्धकोऽसमः
भक्तनेत्रकौमुदीव योगिराड् विराजते ॥ २० ॥

यो हठक्रियाप्रवीणताविमुग्धमानवः[1]
वज्रकायसंपदा विभूषितः सुगर्वितः ।
व्योमकायतीक्ष्णशस्त्रपातभीषितोयतः
शंभुयोगसम्पदा विभूषितोऽल्लमो मतः ॥ २१ ॥

यस्य दर्शनं शिवागमोक्तबोधसाधनं
वाक्सुधाविमुग्धलोकतृष्णिकाविमोचनम् ।
स्पर्शनं पदाग्रयोश्च सर्वपापमोचनं
वीक्षणं समग्रतापभीतिवन्हिनाशनम् ॥ २२ ॥

यत्कृपावलम्बनात् शिवागमार्थपूर्णता
शैवबोधधन्यता च भक्तिभावपुष्टता ।
सत्क्रियाविशिष्टता चरार्चनाद्यमोघता
शांभवव्रतस्य सत्फलत्वसिद्धिरीक्षिता ॥ २३ ॥

(स्रग्विणीवृत्तम्)

शून्यसिंहासनारोहणं सार्थकं
अल्लमस्याद्भुतं भक्तवृन्दादृतम् ।
मन्त्रिमुख्येन यत्साधितं ह्यबाधकं
दुष्टचित्तशासनं सत्प्रभावपूरितम् ॥ २४ ॥

1) गोरक्षनाथः हठयोगसिद्धः

(इन्द्रवज्रावृत्तम्)

अभूतपूर्वं मुदितो जनार्णवः
समीक्ष्य तद्रम्यमहोत्सवं शुभम् ।
नितान्तधन्यं मनुते स्वजीवितम्
सनाथतां नीयत एव दर्शनम् ॥ २५ ॥

इति शिवकवि डॉ. परड्डी मल्लिकार्जुन विरचिते बसवभास्करोदये महाकाव्ये शून्यसिंहासनारोहणं नाम दशमः सर्गः ।

एकादशः सर्गः

(शार्दूलविक्रीडितम्)

नागाम्बा बसवेश्वरस्य भगिनी ज्येष्टा च गर्भस्थितं
पुत्रं सत्कुलसंभवं वहति या सद्यःप्रसूः सम्मतम् ।
येनेदं सकलं जगत् प्रमुदितं वृष्टिर्नभस्थैः सुरैः
पुष्पाणां च कृता प्रसन्नवदनैर्हर्षप्रदा भासुरा ॥ १ ॥

गर्भस्थे निजलिंगसंगनितामोदः शिशुः सद्गुरोः
कारुण्याद् गतकल्मषः कलिमलध्वंसी च लिंगोद्भवः ।
माता पुण्यफलं सुतोदयनिमित्तं प्राप शुद्धाशया
येनात्यन्तसुखानुभूतिरभवत् मन्त्रीश्वरस्यासमम् ॥ २ ॥

सद्गर्भोदयभूतिरस्ति ललनामातृत्वपुण्योदयात्
नागाम्बा भुवनैकवन्दितगुणा मान्या गणाधीश्वरैः ।
साफल्यं मनुते स्वजीविततरतेः लोकोपकारोदयात्
जातो जन्मवतां गुणैकनिलयश्चाग्रेसरो भास्करः ॥ ३ ॥

यच्चन्द्रास्यविलोकनेन जननीचित्ताख्यनीलोत्पलं
सद्यो याति विकासमद्भुतमहो योषिद्वराराधितम् ।
हृत्पद्मं च तदास्यसूर्यकिरणैरुत्फुल्लमन्यादृशं
धन्या सा जननी जनादृतगुणं प्राप्नोति या संमतम् ॥ ४ ॥

यो वा चन्द्रसमानमस्य वदनं पश्यन् क्षणं तिष्ठति
सन्तोषं परमं स्वमनोभिलषितं धन्यो लभेत स्वयम् ।
प्रत्यस्ताखिललोकभोगनिलयो बद्धादरः श्रेयसि
तादृक्पुत्रफलोदयं प्रति रुचिर्जायेत जायारतिः ॥ ५ ॥

यावद्रोदिति जन्मदुःखमसकृत् स्मृत्वा शिवानुग्रहात्
तद्रक्ताधरपल्लवप्रणयिनस्ते विद्रुमा निर्जिताः ।
लोकाज्ञानविलोकनं पुनरहो कृत्वा हसत्यात्मवान्
ईषल्लक्षितदन्तपङ्क्तिरमला मुक्तावलीभासुरा ॥ ६ ॥

यावत्क्रीडति बालकैरनुदिनं भक्तात्मजैः संगतः
लिङ्गोपासनमेव तस्य विषयो नान्यत् क्वचित् क्रीडनम् ।
संलापं कुरुते यदात्मसखिभिः स्मेराननेन्दुप्रभः
स्तोत्रं श्रोत्ररसायनं च गिरिजाकान्तस्य कामारिणः ॥ ७ ॥

यो वा पश्यति तं कुमारमनघं पूजारतं क्रीडने
दैवाच्छंकरतेजसं च निजया कान्त्या जितेन्दीवरम् ।
धन्याः सोऽपि विना तदीयवदनालोकं मुहुः खिद्यति
अस्योदारमतेः किमेव जननीमुख्याः सुहृदबान्धवाः ॥ ८ ॥

यस्योदात्तविचारपूर्णमनसो वक्त्रं शरच्चन्द्रिका-
कान्तं शान्तमथापि लोकनयनानन्दप्रदं सन्ततम् ।
यद्भावश्शिवभावनापरिणतश्चेष्टाः सपर्यात्मकाः
दृष्ट्वा तं शिवयोगशान्तवदनं धन्याः शिवाराधकाः ॥ ९ ॥

मन्त्रीशोऽपि[1] सदा नृपालसुनयव्यग्रः शिवानुग्रहात्
शिष्यत्वेन सहोदरीसुतममुं[2] स्वीकृत्य गर्भोदयात् ।
प्राप्याध्यात्मसुबोधसम्पदमहो शैवागमाभ्यासिनं
वेदान्तादिविशिष्टशास्त्ररसिकं चक्रे गिरीशप्रभम् ॥ १० ॥

वेदान्तोदितसत्पुराणकथितव्याख्यानगम्येश्वरम्
ब्रम्हाख्यं शिवलिंगरूपमजडं जिज्ञासुरेकान्ततः ।
तत्तच्छास्त्रपुराणवेदनिलयो जातः सदाभ्यासतः
विद्यां तापविमोचिनीं शिवमतिर्लेभेऽभयामक्षराम् ॥ ११ ॥

भक्तिज्ञानसमागमादनुदिनं लोकाधिकः साधकः
लिंगाराधनतत्परः परतरे शम्भौ सदा भक्तिमान् ।
सर्वेषां चरणार्चनेपि रुचिमान् यो जंगमानां स्वयं
वृद्धानामपि गौरवास्पदमभूद् बालोऽपि विद्यामयः ॥ १२ ॥

यः पौराणिकवीरशैवसरणिप्राग्रेसरः शाम्भवे
योगे लौकिकभोगदुष्फलभरप्रध्वंसने निर्भयः ।
दक्षो वैदिकवाङ्मये शुभतरे शम्भुप्रभाभूषिते
श्रीशैवागमविद्यया पुनरहो नम्रस्ततोऽलंकृतः ॥ १३ ॥

यो वा दर्शनशास्त्रबोधचतुरश्चाऽद्वैतवेदान्तिनां
मूर्धन्योऽखिलनीतिशास्त्रनिपुणो लिंगादितत्त्वार्थवान् ।
अष्टाच्छादनमर्मबोधरसिकश्चाचारपूर्णः स्वयं
यो वा षट्स्थलमार्गसिद्धविभवो बाल्येऽपि वृद्धाप्यवान् ॥१४॥

1) बसवेश्वरः 2) चन्नबसवः

प्राप्ते यौवनकाम्यभोगसमये श्रीशम्भुयोगोदयः
सद्विद्यागमशुद्धजीवनमहो तस्याभवत् संस्कृतम् ।
दारिद्र्यं विविधोपभोगविषये संपच्चराराधने
पंगुत्वं परदारसंगमविधौ लिंगार्चने शीघ्रता ॥ १५ ॥

सौभाग्यं बसवादिपुण्यपुरुषोदारोपदेशोदये
तस्याभून्मितभाषिणो गिरिसुताकान्तार्चनप्रेमिणः
दौर्भाग्यं बहुभाषिणां कुमतसिद्धान्तोपदेशव्रता-
नुष्ठानं कुरुतां कुरीतिकुनयालंकारिणां रागिणाम् ॥ १६ ॥

कारुण्यं सकलेऽपि जीवनिवहे गौरीपतेः सन्ततौ
सद्भक्ताः शिवयोगपूर्णमनसस्तस्याभवन् सोदराः ।
विश्वं तस्य सुरम्यहर्म्यमभवन्माता हिमाद्रेः सुता
तातोऽनंगरिपुः प्रभावनिभृतस्तस्मिन् जनाः सादरा ॥ १७ ॥

वेदान्तोदितवीरशैवनयनो वेदागमप्राणवान
सच्छास्त्रोदितनीतिमार्गनिपुणः पंचाक्षरीप्राणवान् ।
भस्मालेपनतोषितः शिवपदाम्बुप्रीणितः सद्गुरु-
कारुण्याप्तशिवप्रसादमहिमा लिंगांगयोगेश्वरः ॥ १८ ॥

चातुर्यं चरसेवने गुरुकृपालाभे गिरीशार्चने
कातर्यं शिवभक्तवृन्दपरितोषप्राप्तिहेतौ पुनः ।
आचार्ये दृढभक्तिभावगरिमा सन्मार्गदर्शिन्यहो
आश्चर्यं बसवप्रसादसदृशे सर्वं शिवाराधके ॥ १९ ॥

पंचाचारपरायणोऽपि गुरुशुश्रूषापरः षट्स्थल-
ज्ञानाधिक्यबलेन लोकविरतो बोधप्रदोऽलौकिकः ।
गौरीवल्लभभक्तिभावमहिमानिर्धूतपंकत्रयः[1]
सर्वाचार्यगणोचितो भवति यो वृद्धो जरावर्जितः ॥ २० ॥

तेनाचार्यपदांकितेन बसवः व्यस्तः प्रजारंजने
राजाज्ञानुचरश्चरार्पितमनाः लोकोपकारक्षमः ।
विश्रान्ति लभते क्षणं द्विगुणितोत्साहः प्रजाराधने
साफल्यं तनुते यशस्त्रिभुवनव्याप्तं च लोकोत्तरम् ॥ २१ ॥

तस्मिन् धार्मिकसत्क्रियाभरहरे सर्वे शिवाराधकाः
नेतारं परमं शिवागमविदं लब्ध्वा ननन्दुःप्रियम् ।
माता मोदरसार्णवे ह्यनुपमे मग्ना च धन्या ततः
आलास्येन चरादिवेषनिपुणा भीताःस्वकार्ये रताः ॥ २२ ॥

लोकाराधनमेव धूर्जटिसपर्यासत्क्रियासंगतं
सर्वं तत्खलु भारकारि मनुते लोको यतः संभ्रमात् ।
ईशस्तोत्रमतीवरम्यसुगमं मत्वालसाः सम्मतं
निश्चिन्ता निजजीविकार्जनविधौ धर्मोपजीवा भयात् ॥ २३ ॥

(अनुष्टुभ्)

बसवेशकृतादेशपालनोत्सुक चेतसा ।
श्री चन्नबसवः प्राज्ञः शरणव्रजपालकः ॥ २४ ॥

---

1) पंकत्रयं–मलत्रयं–आणवमलं, कार्मिकमलं मायामलं च ।

मातुलो बसवेशोऽपि षट्स्थलब्रम्हणि स्वयं
न्यस्तभारो महाराजमन्त्रणे बद्धकंकणः ॥ २५ ॥

इति शिवकवि डॉ. परड्डी मल्लिकार्जुन विरचिते
बसवभास्करोदये महाकाव्ये चन्नबसवोदयो
नाम एकादशः सर्गः ।

द्वादशः सर्गः

(भुजङ्गप्रयातवृत्तम्)

शिवानन्दतृप्तौ विवेकप्रपूर्णौ
जितक्रोधवेगौ शिवार्चाप्रवीणौ ।
सतां दम्पती[1] सम्मतौ भाग्यवन्तौ
वयोवृद्धिजीर्णावसन्तानचिन्तौ ॥ १ ॥

तयोर्भक्तिभावप्रसन्नो गिरीशः
सुतं मुग्धमेकं ददौ मन्दहासम् ।
व्यतीते शिशुत्वे वने गोपवृत्त्या
चरन् गुप्ततेजाः शिवार्चापरोऽभूत् ॥ २ ॥

पशूनां पतित्वं भवानीपतेर्यत्
पुराणागमेषु श्रुतावुक्तमेतत् ।
यतः पाशबद्धो जगज्जीविसंघः
पतिस्तस्य शम्भुः स्वयं मोक्षदाता ॥ ३ ॥

गिरीशानुकारी त्रिलोकाभिरामः
गवादीन् पशूंस्तान् वने सिद्धरामः ।
चरन् पालयन्यः शिवार्चाप्तकामः
उमेशैकभक्तस्तदा लोककामः ॥ ४ ॥

---

1) सुग्गव्वामुद्दय्याख्यौ ।

स बालोऽपि शम्भुं नगावासरक्तं[2]
दिदृक्षुःसदासीज्जगज्जालमुक्तः ।
भजन् भक्तिभावादुमाकान्तमन्तः
वने गुप्तभक्तिः स्थितोऽनन्यचिन्तः ॥ ५ ॥

(विबुधप्रियावृत्तम्)

मल्लिकार्जुन मल्लिकार्जुन पाहि मां भवपीडितं
मल्लिकार्जुन मल्लिकार्जुन रक्ष मां शरणागतम् ।
शैलवासविचक्षणं जनसंगभीतमिवातुलं
भार्यया भ्रमराम्बया सहितं च लोकहितैषिणम् ।
देवदेवमुदारनिर्मलभक्तवृन्दसुसेवितं
मल्लिकार्जुनमाश्रये यदि मृत्युरद्य करोति किम् ॥ ६ ॥

विश्वसृष्टिरजोजुषं पितरं हि विश्वकुटुम्बिनं
भूतपालनतत्परं ननु सत्त्वपूर्णमुमाधवम् ।
लोकनाशविलक्षणं तमसावृतं भयकारणं
मल्लिकार्जुनमाश्रये यदि मृत्युरद्य करोति किम् ॥ ७ ॥

यद्गिरेः शिखरं सकृद्यो दूरतोऽपि निरीक्षते
पापराशिविमुक्तनिर्मलमानसो दिवि मोदते ।
यस्य दर्शनभाग्यतो मनुजः सुरेशपदाङ्कितः
मल्लिकार्जुनमाश्रये यदि मृत्युरद्य करोति किम् ॥ ८ ॥

---

2) श्रीशैलवासरक्तम् ।

भक्तवत्सलमुग्रदर्शनमद्भुतामलरूपिणं
रोगिणां भवरोगिणां मलिनात्मनां भिषजं परम् ।
कल्पवृक्षमुदारभक्तगणस्य शम्भुपदैषिणः
मल्लिकार्जुनमाश्रये यदि मृत्युरद्य करोति किम् ॥ ९ ॥

दुर्गमे शिखरे वसन्तमुमाधवं धवलस्मितं
दर्शनातुरमानसा मनुजाः सुदूरनिवासिनः ।
यं प्रयान्ति भवान्तकं भयनाशनं श्रुतिसंस्तुतं
मल्लिकार्जुनमाश्रये यदि मृत्युरद्य करोति किम् ॥१०॥

यः स्वयं गिरिजार्धभागो योगिनामधिदैवतं
यः श्मशाननिवासतुष्टः शङ्करोह्यभयंकरः ।
सर्वदा गणनाथयूथसमन्वितः शरणप्रियः
मल्लिकार्जुनमाश्रये यदि मृत्युरद्य करोति किम् ॥११॥

दुर्गमे गिरिकानने कदलीवने विचरन्ति य-
ल्लोकपालदिदृक्षया मुनयस्तपश्चरणे रताः ।
योगिनः स्थिरमानसा नियताशनाश्च महाव्रताः
मल्लिकार्जुनमाश्रये यदि मृत्युरद्य करोति किम् ॥१२॥

दैन्यदुःखनिवारणं शरणागताभयदायिनं
कालकालमुमाधवं शरणागतो भवपीडितः ।
बालको निजबन्धुतर्जनताडितोविषमस्थितः
मल्लिकार्जुनमाश्रये यदि मृत्युरद्य करोति किम् ॥१३॥

(भुजङ्गप्रयातवृत्तम्)

शिवं शैलवासं स्तुवन् हर्षपूर्णः
दिदृक्षातुरः सन् नगं यातुकामः ।
स्वयं पान्थवृन्दे मिलित्वात्मलीनः
प्रतस्थे प्रशस्तं गिरिं सोऽविरामः ॥ १४ ॥

गिरेःसानुमन्यादृशं दूरतोऽपि
विलोक्यैव तुष्टोऽभवत्सिद्धरामः ।
यदीयावलोकान्नरो भक्तिपूर्णः
पवित्रीकृतात्मा भवाम्बोधित्तीर्णः ॥ १५ ॥

इहासंख्यभक्ताः शिवानन्दधन्याः
गताः संचरन्तः सदा लोकमान्याः ।
पदन्यासभीरुः सदाचारमेरुः
स्मरत्येकवारं स कालम्मदेवीम्[1] ॥ १६ ॥

स तत्र स्वमूर्ध्नाऽक्षमो गन्तुकामः
पदान्यासगामी क्षमां याचमानः ।
स्मरन् देवदेवं पदन्यासपूर्वं
शिवं लिङ्गरूपं भजन् भक्तिनम्रः ॥ १७ ॥

---

1) त्रिषष्टिपुरातनगणेऽन्यतमाग्रणी कारिकालम्मे नामा ।

सदैन्यं स्वभक्तं स्थितं सिद्धरामं
प्रभुर्मल्लयाख्यो[2] दयालुर्विलोक्य ।
भजन् मौनमीशः स्थितः शैलवासः
यतः सव्यथोऽ भूच्छिवानन्दकोषः ॥ १८ ॥

शिवेनैव साकं हि किंचित्कदाचित्
न चेद्वक्तुमीशः कुतो जीविताशा ।
विचिन्त्यैवमासीत् स्वदेहार्पणेन
शिवार्चापरो हा हतोऽस्मीति मत्वा ॥ १९ ॥

यदा सिद्धरामो गिरेः कन्दरेऽत-
स्तनुं प्राणमोक्षातुरः पातयित्वा ।
शिवः शक्तियुक्तः स्वभक्तानुरागात्
तदा प्रादुरासीद् दयाब्धिः स्मितास्यः ॥ २० ॥

समीक्ष्यात्मभक्तं सदाचारसक्तं
पुरारिस्तदासीन्महातोषयुक्तः ।
बभाषेऽ नुकम्पामृदुः सुस्वरेण
गृहीत्वा तदीयं कराग्रं करेण ॥ २१ ॥

तवानन्यभक्त्या शिवानन्दतुष्ट्या
परं तुष्टचित्तोऽस्मि तेऽनुग्रहाय ।
पुरं प्राप्य पूर्वं जनानन्दहेतु-
र्भवान् लोककीर्तेर्महापात्रमस्तु ॥ २२ ॥

---

2) मल्लिकार्जुन–

वचा तेन तुष्टः सुधापूरितेन
स्वकं हन्त मेने कृतार्थं चरित्रम् ।
नमस्कृत्य पादद्वये शङ्करस्य
निवृत्तः पुरं स्वं शिवध्यानमग्नः ॥ २३ ॥

समाजक्रियायां शिवार्चामतिःसन्
शिवानन्दसिन्धौ निमग्नः प्रशान्ते ।
अनालस्यसुस्थः सदा शम्भुचित्तः
समाजोपकार्याहितश्चित्तवृत्तिः ॥ २४ ॥

यतो दृष्टिपातस्तटाकादिसृष्टिः
शिवावाससंघः शिवानन्दवृष्टिः ।
वनान्ते लतानां तरूणां समूहः
सदा लोकचिन्तामयः सिद्धरामः ॥ २५ ॥

शिवाशीर्बलाढ्यस्तदा दर्पपूर्णः
शिवोऽहं मदन्यः कुतः कोऽत्रलोके ।
इति प्राप्तगर्वंस्तिरस्कारपूर्वं
जगद्वीक्षमाणो हतः सिद्धरामः ॥ २६ ॥

सगर्वः स्वशिष्योत्तमाद् वेदपाठं
शुनाऽकारयद्यो हसन् विप्रशाठ्यम् ।
शशंस प्रभावं गुरोर्लोकवन्द्यं
शिवाधिक्यबुद्धिर्यतः सिद्धरामः ॥ २७ ॥

यतो नाथराजः[1] सदा वज्रकायः
पराभूतिमाप प्रणामात्मबोधः ।
वियद्देहधारी[2] कृतानेकबोधः
तमुद्धर्तुकामः प्रभुः[3] प्रादुरासीत् ॥ २८ ॥

हसन्नेत्रयुग्मं प्रभूतप्रभावं
प्रसन्नात्मतेजो जितारिप्रभावम् ।
सुधांशूपमानं जनैरप्रमेयं
निरीक्ष्यात्मशक्तौ सशंकः समायः ॥ २९ ॥

तदीयामुदारां प्रबोधप्रणालीं
निशम्यात्मबोधप्रसन्नोऽपि जातः ।
उवाचैनमुक्त्या सुधापूर्णया तं
प्रभुं सिद्धरामः प्रसन्नान्तरात्मा ॥ ३० ॥

गतो विभ्रमो मे करिष्ये वचस्ते
इमं शाधि शिष्यंविमूढं विलज्जम् ।
मया किं हि कार्यं शिवानन्दकोश !
प्रभो ! ब्रूह्यकिंचित्करं मां सलज्जम् ॥ ३१ ॥

---

1) गोरक्षनाथः ।

2) व्योमकायः ।

3) अल्लमप्रभुदेवः ।

भवद्भारतीयं स्रवन्ती त्रिवेणी
क्रियाज्ञानभक्तित्रिवर्गप्रसूतिः ।
कृतार्थोऽस्मि पुण्योदया ते च वाणी
तमोनाशलीला शिवज्ञानमाला ॥ ३२ ॥

त्वदादेशमग्नः शरीरं मदीयं
शिवस्थानमित्थं मनोमि प्रशान्तम् ।
तटाकादिकं मे भवेदन्तरङ्गे
बहिरत्तस्य सृष्टिर्वृथाडम्बरः स्यात् ॥ ३३ ॥

सदा लोककीर्ति बुधालीविनिन्द्यां
यते लब्धुकामो मतेर्वैपरीत्यात् ।
अहंकारनष्टो विनष्ठात्मनिष्ठः
प्रभो ! ज्ञानशून्योऽभवं हास्यपात्रम् ॥ ३४ ॥

कथं प्रीतिपात्रं भवेयं पुरारेः
कथं वेष्टलिङ्गं लभे मोक्षहेतुम् ।
भवत्पुत्रतुल्यं पशुं पाशबद्धं
पथःभ्रष्टमेनं सदा पाहि भीतम् ॥ ३५ ॥

प्रभुः प्राह दीनं क्रियाविस्मृतेशं
"गुरुस्तेऽनुभावी शिवाद्वैतवादी ।
स्वयं षट्स्थलेषु प्रवीणोऽपि दीक्षा-
विधानाग्रगण्यो युवा लोकमान्य"[1] ॥ ३६ ॥

---

1) चन्नबसवः ।

तदा सिद्धरामोऽल्लमेनैव साकं
पुरं प्राप शीघ्रं हि कैलासकल्पम् ।
शिवाचारपूर्णैर्गणाचारयुक्तै-
र्जनैः शान्तचित्तैः सदा संकुलं यत् ॥ ३७ ॥

(द्रुतविलम्बितवृत्तम्)

स्वगुरुसन्निधिमेत्य विनीतवाग्
गुरुकृपास्पृहया विकलीकृतः ।
प्रणमति स्म सदाशिवभासुरं
विमलमानसवित्तसमुन्नतः ॥ ३८ ॥

तदुभयं समवेक्ष्य सुतेजसं
उपनिषद्वचनं स्मृतिमेति यत् ।
गुरुरतीवयुवा करुणामयः
परिणतो वयसाध्ययनातुरः[1] ॥ ३९ ॥

शिवकलामयमीश्वरलिङ्गकं
करपुटेऽस्य निधाय गुरुः स्वयम् ।
प्रणवपूर्वमनुं शिवकीर्तनं[2]
उपदिदेश शुभं श्रवणे पुनः ॥ ४० ॥

---

1) चित्रं वटतरोर्मूले वृद्धाः शिष्या युवा गुरुः ।

2) ॐ नमः शिवायेतिषडक्षरमन्त्रम् ।

भुवनवन्दितचारुचरित्रवान्
गुरुकृपामृतसिंचनपावनः ।
इतरदुर्लभपूर्णविवेकवान्
शशिकलाद्युतिमान् स विराजते ॥ ४१ ॥

इति शिवकवि डॉ. परड्डी मल्लिकार्जुन विरचिते
बसवभास्करोदये महाकाव्ये सिद्धरामविलासः
नाम द्वादशः सर्गः ।

त्रयोदशः सर्गः

(वसन्ततिलकवृत्तम्)

वर्णाश्रमादिनिगडैः प्रतिबन्धिता सा
शूद्रादिजातिजनिता जनता सदैव ।
स्वातन्त्र्यहीनदयनीयदशाविमूढः
क्रन्दत्यहो हि भुवने विमुखे नृपाले ॥ १ ॥

दासीव साऽपि महिला पुरुषोपभोग-
द्रव्यं हि केवलमिहेति पदाभिधात- ।
संताडिता शपति दानववृन्दमेनं
सीता विलोकनपरा प्रति गेहमेति ॥ २ ॥

या सूतकादिसहजामयदोषपूर्णा
शूद्रोपमा भवति शास्त्रकृतावमाना ।
तामेव लोकजननीं शिववल्लभेति
यत्साधितं शिवमते सुधियां सुमान्यम् ॥ ३ ॥

लब्धोदया प्रकटितात्मबलाऽ बलाऽपि
यत्साधयत्यनुपमं पुरुषैरसाध्यम् ।
एतच्छिवानुभवमण्टपदर्शनीयं
स्त्रीणां यतः सबलता पुरुषैः समाना ॥ ४ ॥

गङ्गाधरान्तर[1]दयाकृतलोकतोषाः
पत्यादिभिश्च सहिताः सहिताः स्वतन्त्राः ।
पुंवत्स्त्रियोऽपि विमलाशयपूर्णचित्ताः
औन्यत्यमेत्य जगतीतलरम्यभूषाः ॥ ५ ॥

तेषु स्वतन्त्रमतिषु क्षितिमण्डनेषु
योषिद्गणेषु भवति प्रमुखाक्कपूर्वा
देवी महत्पदविभूषितनामधेया[2]
चूडामणिः शिवकलत्रमतीतमाया ॥ ६ ॥

श्रीशम्भुभक्तिविमलीकृतपितृगर्भात्[3]
जातोरुभक्तिरवनीतलमण्डनं सा ।
स्त्रीरूपधारिशिवभक्तिरतीवरम्या
साधुस्वभावजनचित्तहराऽभिरामा ॥ ७ ॥

पूतं यथा गिरिकुलं गिरिजोदयेन
प्रीतौ यथा च पितरौ वदनावलोकात् ।
तस्यास्तथैव पितरौ सकुलौ प्रसन्नौ
यस्या जनिः शिवमतोदयलाञ्छनं तत् ॥ ८ ॥

---

1) बसवेश्वरः ।

2) अक्कमहादेवी ।

3) सुमतिनिर्मलौ मातापितरौ ।

बाल्ये यतः शिवरतिर्गिरिजेव पूता
एतद्विवाहविषये सभया हि माता ।
लोकाभिरामवपुषा जितचन्द्रबिम्बां
संरक्षयामि कथमित्यतिचिन्तिताम्बा ॥ ९ ॥

यस्या वपुर्गिरिसुताधिकरम्यरूपं
नैर्मल्यपूर्णमसमं च सकृद्विलोक्य ।
कश्चित्कदापि विकलो रहितो यदि स्याद्-
वात्सल्यपूर्णहृदयः किमु बन्धुवर्गः ॥ १० ॥

क्रीडापि सैकतविनिर्मितलिङ्गमूर्त्या
गीतं च शम्भुगुणकीर्तनरम्यवर्णम् ।
भक्तिप्रधानकथनश्रवणैकमग्ना
चित्ते सदा शिवगुणस्मृतिरागमोक्ता ॥ ११ ॥

मेनात्मजा गिरिसुता शिवभावपूर्णा
मत्वा पतिं भवहरं कुरुते सपर्याम् ।
बाल्ये यथैव शरणं शिवमेत्यपर्णा
शर्वानुरागरसिका च तथा कुमारी ॥ १२ ॥

इत्थं नवे वयसि चन्द्रकलासुरम्या
सत्संगमाप्तविमलेश्वरभक्तिसौम्या ।
संसारघोरवरुणालयलङ्घनाशा
लोकाधिका भवति बोधगुणाप्ततोषा ॥ १३ ॥

नार्या भवेत्क्षितितले पतिरेक एव
आध्यात्मिको भवति हन्त तथा द्वितीयः ।
क्लेशोऽधिको भवति तद्द्वयसेवने य-
स्तत्त्यागशान्तमनसा सुखिताबलेयम् ॥ १४ ॥

वाचा स्वकीयतनुना मनसेन्द्रियैश्च
शुद्धिं तनोति शरणैः स्वह वासमेत्य ।
भर्तारमात्मसदृशं गिरिजाधवं तं
मत्वा परं पुरुषमात्मसहोदरं सा ॥ १५ ॥

कामातुरो जगति योऽपि निरस्तलज्जः
सौन्दर्यपूर्णवपुषं समवेक्ष्य बालाम् ।
अध्यात्मवह्निकणिकां मनुते मणिं स
चेतोविकारसहिते न नरे विवेकः ॥ १६ ॥

राजापि कौशिक इति प्रथितः प्रभावी
तद्देहसंगसुखलोभनिरस्तलज्जः ।
स्वीयाधिकारबलतो हठतोऽबलां ता-
मन्तःपुरे शिवसतीं च बबन्ध मूढः ॥ १७ ॥

वस्त्रं विहाय भवबन्धनमूर्तरूपं
शम्भुप्रसादरसिका शिवभक्तगोष्ठीम् ।
श्री अल्लमादिशरणैश्च निरीक्ष्यमाणा
कल्याणपावनपुरे सहसा प्रविष्टा ॥ १८ ॥

निन्द्यं शरीरमिदमामयपूर्णमेव
राजोपदेशकृतयेऽपि पुनर्विवस्त्रा ।
तादृक्स्वरूपमपि रन्तुमनास्तदानीं
वृत्तिं शुनोऽ प्रकटयन्नरदेहधारी ॥ १९ ॥

एकाकिनी नववयःसुकुमारदेहां
दृष्ट्वा सुचारुवपुषं तरुणीं विवस्त्राम् ।
रागान्विता विविधविघ्नकरा बभूवुः
तान् प्रत्यसौ सकरुणा ह्युपदेशमग्ना ॥ २० ॥

लिङ्गैकनिष्ठमनसा भवतापदूरां
भक्तैकबन्धुमबलां सबलाममायाम् ।
जिज्ञासवः सकललोकहितैकसक्ताः
पृच्छन्ति नैकविधमात्मरतां विरक्ताः ॥ २१ ॥

नग्नं कलेवरमिदं कुसुमायुधस्य
प्रोत्साहकं जनमनोव्यथकं वृथैव ।
आच्छादिते शिरसिजेन भगप्रदेशे
को वा गुणो भवति साध्वि कुतो निराशा ॥ २२ ॥

कायं हि वस्त्ररहितं सहसा विलोक्य
मा भूद् विकार इति सा सदयं स्वकीय- ।
कामेन्द्रियं शिरसिजावृत्तमेनमुक्त्वा
तत्प्रीतिपात्रमभवन्मदनारिभक्ता ॥ २३ ॥

योगाङ्गसिद्धिनिपुणा शिवयोगपूर्णा
कायाख्यरम्यकदलीवनगूढवासम् ।
श्री मल्लिकार्जुनपतिं हृदयाब्जगुप्त-
मन्वेषयत्यनुदिनं विरहाग्नितप्ता ॥ २४ ॥

तस्य स्वबान्धवगणस्य सहायमेव-
माशीर्वचः शुचिमतिः शुभकामनाश्च ।
लब्ध्वा शिवं निजपतिं प्रति गन्तुकामा
मातुर्गृहं त्यजति सा निजकान्तरक्ता ॥ २५ ॥

बाल्यात्प्रभृत्यनुदिनं रमणं रमेशं
मत्वा सहोदरगणं पुरुषान्तराणि ।
मीरा यथा मधुरभक्तियुता प्रसिद्धा
भर्तारमैच्छदतुलंशिवयोगिनी सा ॥ २६ ॥

श्रीशैलरम्यकदलीवनमप्रमेय-
मध्यात्ममेरुदृशंपरमं प्रविष्टा ।
लिङ्गाङ्गसङ्गसुखलाभमनास्तदैक्य-
सौख्यं च शाश्वतमहो लभते तदन्ते ॥ २७ ॥

अल्पे वयस्यतुलसिद्धिमवेक्ष्य सन्तः
आश्चर्यपूर्णहृदयाः शिवशक्तिमन्तः ।
तामग्रजां शिवरतां प्रवदन्ति मान्याः
प्रीणाति यः परशिवं भुवने स धन्यः ॥ २८ ॥

साऽलौकिकी शिवकला भुवनावतीर्णा
उद्धर्तुमेव सकलां मनुसन्तर्ति या ।
अम्भोदजाततडिदा सुविलासरम्या
लीना पुनर्गिरिसुतारमणे समाना ॥ २९ ॥

(शार्दूलविक्रीडितवृत्तम्)

वैराग्यापरनामधेयमसमं भक्तिप्रभामण्डलं
ज्ञानज्योतिरिहावतीर्णमभवत्स्त्रीरूपमत्यद्भुतम् ।
कामारात्यनुरागपूर्णमनसा प्रापंचिकं तत्सुखं
मोक्षार्थं च विहाय पावनतया श्रीशैललीनाऽभवत् ॥ ३० ॥

इति शिवकवि डॉ. परड्डी मल्लिकार्जुन विरचिते
बसवभास्करोदये महाकाव्ये वीरविरागिणीविलासो
नाम त्रयोदशः सर्गः ।

चतुर्दशः सर्गः

(शार्दूलविक्रीडितवृत्तम्)

भक्तिज्ञानपरा विवेकनिधयः शम्भुव्रतोपासकाः
नानादेशसमागताः सुमतयः सन्मार्गसंचारिणः ।
दीक्षाधिक्कृतपूर्ववर्णरचनाः सर्वोदयाराधकाः
सर्वे तं बसवं स्तुवन्ति शरणाः शम्भुप्रभाधारिणम् ॥ १ ॥

यत्रासौ शिवयोगिपुङ्गव इति ख्यातोऽल्लमोऽध्यक्षतां
धत्ते तत्र शिवानुभावभवने सायन्तने प्रत्यहम् ।
विश्रान्ता मिलिताः परस्परमहो वार्तां लपन्तो मुहुः
स्वीयं तात्त्विकचिन्तनं प्रकटयन्तीशप्रसादोन्मुखाः ॥ २ ॥

येषामक्रमपूजनं परशिवे भक्तिः स्थिराऽलौकिकी
ये वा धूर्जटितुष्टयेऽर्पणविधावग्रेसरा दीक्षिताः ।
सर्वे ते शिवभक्तिपावनतमा धन्याः पुरारिप्रियाः
हित्वा हिंसनपूर्वकं विधिमहो मान्याः सदाचारिणाम् ॥ ३ ॥

येषां कण्णपनाम लुब्धकवरः शम्भुप्रियः सम्मतः
वेदोक्ताचरणप्रियः शुचितनुर्विप्रस्तथाऽसम्मतः ।
वेश्यावक्षसि लि ङ्गदर्शनमहो येन कृतं पावनं
सोऽयं सौन्दरनम्बिनाम शरणो येषां सुमान्योऽभवत् ॥ ४ ॥

यैनासौ शरणव्रजः प्रचलितः कैलासमार्गेण स
तस्याभूच्चरणारविन्दरजसा त्रैलोक्यसंपूजितः ।
मूर्ध्ना मुग्धधिया चचार मुदिता तस्मिन् पुनर्या सती
सर्वे ते शरणाः प्रभावरहिताः श्रीकारिकालम्मया ॥ ५ ॥

येषामागमवेदशास्त्रगणना लिङ्गादिसद्भावने
वित्तं जङ्गमतुष्टये वपुरहो स्वाचार्यसंप्रीतये ।
चित्तं तच्चरलिङ्गपूजनविधौ युक्तं सदा पावनं
भक्त्या तद्बसवेश्वरस्तुतिपराः सर्वेऽपि बद्धादराः ॥ ६ ॥

वृद्धत्वं जरसा विना बहुमतं येषामुमाबन्धव-
भक्तानां सकलाः क्रिया गिरिसुतानाथार्चनं पावनम् ।
अध्यात्मे नहि लिङ्गभेदगणना नो वर्णभेदोद्भवः
सर्वे लौकिकपारलौकिकसुखास्वादे समानोदयाः ॥ ७ ॥

येषां वाङ्मृदुता तपो जनमनस्तुष्टिप्रदा सर्वदा
गौरीवल्लभसंस्तुता शुभकरा वैरप्रणाशोद्यता ।
येषां जंगमतुष्टिरस्ति शिवलिङ्गार्चाफलं सम्मतं
येषां भिक्षुकलाभवंचनमहो दारिद्र्यदुःखप्रदम् ॥ ४ ॥

ये वा पावनकर्मयोगनिरताः शम्भुप्रसादप्रियाः
याञ्चा सा धरणीशलक्षणमिति ज्ञात्वा च यैः साधुभिः ।
दैन्यं मृत्युभयङ्करं सपदि वै येषां शिवज्ञानिनाम्
सत्यं लौकिकजीवनं वपुरहो देवालयो निर्मलम् ॥ ९ ॥

वर्णोद्योगविभिन्नता न सफला सद्भक्तभेदोदये
येषामेकगुरुः सदा गिरिसुतानाथः पशूनां पतिः ।
भूतिर्भालविभूषणं शिवनुतिर्वाग्भूषणं निर्भया
चेतस्तृप्ततया परस्वहरणं येषां कृते पातकम् ॥ १० ॥

अध्यक्षः शरणानुवाच सकलान् श्री अल्लमो योगिराट्
'अस्तित्वं गिरिजापतेः श्रुतिततेर्वाक्यादृतं वर्ण्यताम्' ।
भक्तानां विनयाधिको बसवनामाग्रसरो भास्करः
स्वीयाध्यात्मिकवैभवं स्ववचसा व्यक्तीकरोत्यादरात् ॥ ११ ॥

(वसन्ततिलकवृत्तम्)

अम्भोधिगर्भनिभृतज्वलनप्रभेव
सस्ये यथा रसरुचिर्मधुरा विशिष्टा ।
गन्धस्तु कुड्मल इव प्रभुसंगमेश
कन्यानुरागसदृशी तव देव सत्ता ॥ १२ ॥

(शार्दूलविक्रीडितवृत्तम्)

अक्के[1]त्यादरपूर्वकं शरणविख्याता शिवाराधिका
वैराग्यप्रतिमावतार इति या लोकैश्च सम्भाविता ।
भक्त्या निर्जितशैलराजतनया शम्भोः कला सात्त्विकी
ब्रूते स्वानुभवैकगम्यविषयं सर्वोपकारक्षमा ॥ १३ ॥

---

1) अक्कमहादेवी ।

पाषाणोदरवर्ति काञ्चननिभं द्रव्यं यथा भूतले
तैलं चापि तिरोहितं तिलगणे लीना सचिर्या फले ।
भावान्तर्गमनादमेयविषयं ब्रह्म प्रभामण्डलं
किं ज्ञातुं प्रभु मल्लिकार्जुन! नरः शक्तो विदग्धोऽमलः ॥ १४ ॥

सर्वेषां शिवभक्तिपूतमनसां प्रज्ञावतां देहिनां
मुक्तिः शम्भुसमागमो निरुपमो ध्येयं परं योगिनां ।
मुक्तिः शाश्वतसौख्यदा बुधनुता कीदृक् भवेद् वर्ण्यतां
इत्युक्तेऽल्लमयोगिना बसवशिष्येणो[1]क्तमेतद्वचः ॥ १५ ॥

चन्द्रेऽनन्यतया यथा जनहिता ज्योत्स्ना स्थिरा पावना
भानौ तत्किरणप्रभाविकसितं वह्नौ यथा तत्कणः ।
दीपे ज्योतिरिवार्पितं नदजलं लीनं समुद्रे क्षणं
द्वन्द्वातीतमनास्तथा शिवमना लिङ्गैक्यसौख्यान्वितः ॥ १६ ॥

(अनुष्टुभ्)

अल्लमप्रभुदेवेन शिवानुभवमण्डपे ।
सत्यशुद्धक्रियाशक्ति[2]विषयः प्रस्तावितोऽ परः ॥ १७ ॥

अमरेशांकसङ्कूक्तौ 'मारय्य' इति विश्रुतः ।
स्वानुभूतिप्रकाशं वै दर्शयामास सम्मतम् ॥ १८ ॥

---

1) चन्नबसवः ।

2) 'कायक' इति कर्णाटकभाषाप्रसिद्धः शब्दः ।

(स्रग्विणीवृत्तम्)

सत्यशुद्धक्रियासक्तचित्तो नरः
सद्गुरोर्दर्शनं लिङ्गपूजादिकम् ।
जङ्गमाद्यर्चनं सर्वलोकादृतं
विस्मरेत् 'सत्क्रिया देवलोकाधिका' ॥ १९ ॥

संगमेशानुकंपासुमान्यः क्षितौ
शम्भुना च द्वितीयेन[1] यद्भण्यते ।
तद्वचोवर्णनं सर्वमान्यं यतः
सत्क्रियागौरवं लोकसंकीर्तितम् ॥ २० ॥

सत्क्रियावर्जितं यद्धनं संचितं
लिङ्गपूजोपचारक्षमं नैव तत् ।
यच्छुनीक्षीरमेतन्न पंचामृते
युज्यते संगमेशप्रभो ! निन्दितम् ॥ २१ ॥

जातिलिङ्गादिभेदप्रभावर्जितं
विश्वमान्यं समाजं सतां निर्मितुम् ।
शम्भुभक्ताः समस्ताः समानोदयाः
चेतसा कर्मणा कामयन्ति स्वयम् ॥ २२ ॥

---

1) बसवेश्वरेण ।

लिङ्गदीक्षायुताः सर्वथा पावनाः
वर्णभेदप्रभावातिरिक्ताः क्षितौ ।
सत्यमेतद् ब्रुवन् शम्भुभक्ताग्रणी
विश्ववन्द्यो भवत्येव मन्त्रीश्वरः ॥ २३ ॥

(वसन्ततिलकवृत्तम्)

दासीसुतो यदपि वेशवधूकुमारः
दीक्षामयो यदि भवेच्छिवतुल्यतेजाः ।
तत्पादवारिरसिकोऽस्तु स वीरशैवः
श्री संगमेश ! नरके पतनं प्रमादात् ॥ २४ ॥

(स्रग्विणीवृत्तम्)

साम्यवादे रताः वीरशैवाः सदा
वर्णलिङ्गादिभेदैर्विमुक्ताः मुदा ।
दास्यभावं[1] वहन्तः सदाचारिणो
लिङ्गलीना भवन्त्येव शैवोत्तमाः ॥ २५ ॥

(वसन्ततिलकवृत्तम्)

सा केवलं न समता प्रमदाजनस्य
स्वातन्त्र्यपूर्णसहजस्थितिरप्युदारा ।
पारम्यमीश्वर इति प्रथितस्य शम्भोः
वर्णाश्रमादिरहिते शिवयोगमार्गे ॥ २६ ॥

---

1) दासोऽहंभावः ।

(स्त्रग्विणीवृत्तम्)

यस्य भालं च भस्मत्रिपुंड्रांकितं
कण्ठशोभाकरं चेष्टलिंगं सदा ।
यन्मुखं पावनं शम्भुमन्त्राङ्कितं
वीरशैवः स भक्ताग्रगण्यो मुदा ॥ २७ ॥

लिङ्गनिष्ठः सदाचारपूर्णः सदा
जंगमाराधने तत्परो नापरे ।
सद्गुरोः सेवया नित्यतृप्तः सुधीः
वीरशैवः स एव क्षितौ नापरः ॥ २८ ॥

पादतीर्थं प्रसादं च भुक्त्वा नरो
मोक्षलक्ष्मीवरो वीरशैवाभिधः ।
पूर्वजन्मार्जिताद् यस्य पुण्योदयाद्
भुक्तिमुक्तिप्रदा चान्तिमैषा जनिः ॥ २९ ॥

षट्स्थल[1]ज्ञाननिष्ठातुला निर्मला
शम्भुसायुज्यदा सम्यगाराधिता ।
ज्ञानभक्तिक्रियासंगमोऽत्यद्भुतः
सर्वलोकाधिको वीरशैवोऽमलः ॥ ३० ॥

वर्णलिङ्गादिभेदप्रभावर्जिते
साम्यवादप्रभावप्रजारञ्चके ।
वीरशैवक्रियाचारबोधादृते
भक्तिपूर्णाः समाजे समानोदयाः ॥ ३१ ॥

---

1) भक्ताद्यैक्यान्तानि षट्स्थलानि ।

सर्वतो बोधपूर्णाः स्वतन्त्रा यतः
स्वानुभावं ब्रुवाणाः पवित्रास्ततः ।
वेदवेदान्तवाक्यैः प्रमाणीकृतं
यत् शिवोक्तागमानां च सारायितम् ॥ ३२ ॥

दर्शनं वीरशैवाख्यमन्यादृशं
सर्वलोकोपकारक्षमं पावनम् ।
तत्त्वजालं क्रियाचारशीलं नवं
विश्वबान्धव्यपूर्णं शिवाराधनम् ॥ ३३ ॥

सिन्धवः सागरं प्राप्य गम्यं क्षितौ
पूर्वरूपं त्यजन्त्येकरूपोदकाः ।
येऽपि नानाविधा मानवाः संगता
शैवधर्मप्रभावांकिताः साधकाः ॥ ३४ ॥

(शार्दूलविक्रीडितवृत्तम्)

इत्थं लौकिकपारलौकिकसुखप्राप्त्यै सुदूरागताः ।
कल्याणाद्भुतवीरशैवभवने भूलोकसंभाविते ।
नानादेशसमागताश्च शरणाः बोधप्रदाः साधकाः
कारुण्याद् गिरिजाधवस्य सदयाः सत्कार्यलोकाधिकाः ॥ ३५ ॥

इति शिवकवि डॉ. परड्डी मल्लिकार्जुन विरचिते
बसवभास्करोदये महाकाव्ये शिवानुभवगोष्ठी
नाम चतुर्दशः सर्गः ।

पञ्चदशः सर्गः

(उपेन्द्रवज्रावृत्तम्)

पुरारिभक्ताः शिवमन्त्रपूताः
शिवागमज्ञानविशुद्धसत्त्वाः ।
करस्थलिङ्गार्चनतत्परा ये
तेषां मते शम्भुरनन्तकायः ॥ १ ॥

शिवानुभावैकरुचिप्रबुद्धाः
समस्तलोकोपकृतिप्रमोदाः ।
शिवस्य पारम्यमुदारचित्ताः
प्रख्यापयन्तः शरणा विनीताः ॥ २ ॥

पुरातनानां शिवभक्तिपूत-
हृदम्बुजानां स्मरणे सुलग्नाः ।
यतः स्वयं शम्भुकृपाविशेषात्
प्रलीतचित्ताः शिवयोगमग्नाः ॥ ३ ॥

शिवानुभावैकनिजप्रमाणाः
शिवागमाधारविचारपूर्णाः ।
पुरातनाख्यानविनीतचित्ता
गिरिशभक्ताः बसवप्रभुत्वे ॥ ४ ॥

प्रभुश्च तेषां बसवः प्रसन्नः
क्वचिन्न मायाविपदाभिलाषः ।
परोपकाराप्तपरप्रकाशः
प्रकाशते लौकिककर्मलीनः ॥ ५ ॥

इमां प्रतिज्ञा बसवः प्रभावी
समस्तसद्भक्तगणाग्रगण्यः ।
करोति वैराग्यनिधिर्निधिज्ञः
परिग्रहध्वंसनकर्मलीनः ॥ ६ ॥

सुवर्णकांक्षा वसनाभिलाषः
क्वचिद् भवेच्चेतसि मे सलेशः ।
शिवापरागानलदग्धकायः
विरागिनिन्द्योऽस्मि यतः समायः ॥ ७ ॥

गृहे स्वयं तद्वसवप्रियायाः
सुवर्णलोभो न विनाशमेति ।
तदल्पलाभादृतचित्तवृत्तिः
गृहे निशायां प्रविवेश चोरः ॥ ८ ॥

विचिन्वता तेन धनं न लब्धं
न वा नवं वस्त्रविभूषणादि ।
निराशचित्तो निभृतं सचिन्तः
स्थितः क्षणं दस्युरनाप्तवित्तः ॥ ९ ॥

बहिर्गृहाद्गन्तुमनास्तदानीं
गिरीशभक्तप्रियदारकण्ठे ।
महार्हरत्नाभरणं विलोक्य
तदाप्तुकामो यतते दुरात्मा ॥ १० ॥

कराग्रसंस्पर्शनभीतचित्ता
विमुक्तनिद्रा बसवेशभार्या ।
विरौति कण्ठाभरण प्रलोभाद्
विभूषणैकप्रणया हि नार्यः ॥ ११ ॥

तदीयमाक्रन्दनमात्मलीनः
श्रुणोति यावद् बसवोऽप्रसन्नः ।
ब्रवीति भार्यां भविधर्मपूर्णां
विचारमग्ने सति तस्करेऽस्मिन् ॥ १२ ॥

अयं न दस्युः हिमवत्तनूजा
प्रियः प्रिये ! भौतिकवित्ततुष्टे ।
सुरम्यकण्ठाभरणं त्वदिष्टं
समागतं यत्करुणावलम्बात् ॥ १३ ॥

स्वकीयवित्तं स्वयमेव हर्तुं
समागतश्चाद्य कृपासमुद्रः ।
त्वयात्महस्तेन विशालनेत्रे
प्रदीयतां संगमदेवतृप्त्यै ॥ १४ ॥

यदा पतिः पन्नगभूषणं तं
विचार्य कण्ठाभरणप्रदानम् ।
उपादिशत्संगमतोषहेतुं
ददौ झटित्येव पटच्चराय ॥ १५ ॥

स तस्करो यस्य गले निबद्धं
शिलामयं लिङ्गमदीक्षितस्य ।
अमात्यमुख्यस्य शिवान्तरस्य
निजात्मशक्त्या झटिति प्रबुद्धः ॥ १६ ॥

शिलामयं लिङ्गमसंस्कृतं तत्
विहाय लिङ्गान्तरमप्रयासम् ।
गुरुप्रदत्तं शिवयोगहेतुं
बबन्ध कण्ठे बसवेशदासः ॥ १७ ॥

दिगन्तरायातगिरीशभक्ताः
शिवान्तरप्रेरितशुद्धचित्ताः ।
स्वकर्ममग्ना अपि लोभमुक्ताः
शिवप्रसादैकफलानुसक्ताः ॥ १८ ॥

न तत्र कश्चिच्छरणो दरिद्रः
न याचको नैव परस्वकामः ।
स्वयं च पूर्णः धनदप्रभावः
जितारिषड्वर्गहितस्वभावः ॥ १९ ॥

अमात्यमुख्यो बसवेश्वराख्यः
स भिक्षुकाभावसचिन्तचित्तः ।
नृपप्रभावः कृतराजसख्यः
समर्थयामास वृथा स्ववित्तम् ॥ २० ॥

स्वधर्मनिष्ठा अपि नो मतान्धाः
यतेन्द्रिया यौवनभोगपूर्णाः ।
स्वकर्मकौशल्यनिरस्तदैन्याः
विरक्तचित्तस्तु धनी स धन्यः ॥ २१ ॥

तथा च कल्याणपुरं समृद्धं
पुरान्तराराधितवैभवं च ।
अभूतपूर्वं समवेक्ष्य गर्वात्
नृपोऽपि राज्यं मनुतेऽर्थपूर्णम् ॥ २२ ॥

सुभक्तमारय्यकलत्रभूता
सती च लक्ष्मीति[1] पुरप्रतीता ।
सुवर्णदानेन हि मन्त्रिमुख्यं
तिरश्चकारात्मबलप्रभावा ॥ २३ ॥

अहं प्रभोरल्लमनामकस्य
करोमि तृप्तिं करुणाकरस्य ।
सदान्नपूर्णं हि मदीयपाक-
गृहं चराराधनतत्परं हि ॥ २४ ॥

---

1) आय्दक्किलक्ष्मीदेवी ।

निमन्त्रणादागतमल्लमं तं
प्रभुं प्रभूणां शिवयोगिधुर्यम् ।
समीक्ष्य धन्यं मनुते स्वगेहं
स्वगेहमातिथ्यसमर्थमेवम् ॥ २५ ॥

गुरोः शिवज्ञानमहोदधेस्तद्-
विधाय पूजां गिरीशप्रियेण ।
प्रसादभोगाय निमन्त्रितः सन्
प्रभुः स्वलीलां प्रकटीकरोति ॥ २६ ॥

स्वकिंकरानीतवरामृतान्नं
स्वयोगशक्त्या सकलं हि भुक्त्वा ।
मुनेरगस्त्यस्य सुतेजसोऽपि
समुद्रपानं स्मृतिमातनोति ॥ २७ ॥

प्रभोरसंतृप्तिमुदारचेताः
समीक्ष्य विज्ञातनिजापराधः ।
स्वकायचित्तात्मसमर्पणेन
जगत्यभूज्जंगमतोषधन्यः ॥ २८ ॥

क्रियापवर्गप्रभवो विनीताः
परस्वलाभे नितरामनास्थाः ।
नगेन्द्रकन्याधवभक्तिपूताः
परोपकाराहितचेतसस्ते ॥ २९ ॥

नृपस्य कोशाधिकृतोऽप्यमात्य-
पदप्रभावस्य महामहिम्नः ।
परस्वभीरोरपि लोकभीति-
रभूदतो राजमनोविकारः ॥ ३० ॥

नृशंसकर्णेजपवाग्विषांश-
विमोहितःसन् बसवेऽपि शंकाम् ।
चकार राजा पिशुनप्रभावा-
दहो परप्रत्ययनेयबुद्धिः ॥ ३१ ॥

समक्षमेतस्य जनस्य राजा
परीक्षणं कोशगृहस्य चक्रे ।
समीक्ष्य कोशं परिपूर्णवित्तं
नृपोऽपमानादभवन्नतास्यः ॥ ३२ ॥

उवाच चैनं बसवः स्मितास्यः
नृप ! त्वदीयं द्रविणं किमद्वा ।
नगेन्द्रकन्यारमणस्य भक्ताः
नृपाधिका धिक्कृत लोकवित्ताः ॥ ३३ ॥

भवेद्दरिद्रः स नरो जघन्यः
मनः सदा यस्य धनादिमग्नम् ।
गिरीशवल्लौकिकभोगतृष्णा-
नियन्त्रणे यः सफलः स मान्यः ॥ ३४ ॥

न मे त्वदीये नृप कोशपूर्णे
सुवर्णमुख्ये विभवेऽपितृष्णा ।
प्रजाहितं लौकिकसंपदाढ्यं
समीक्ष्य राजानुचरोऽस्मि जातः ॥ ३५ ॥

गृहाण राजेन्द्र पदं त्वदीयं
न तेऽद्य विश्वासलवोऽप्यमात्ये ।
विमुक्तचिन्तः शरणैकसंगः
स्वतन्त्रतातोषमहं भजामि ॥ ३६ ॥

नृपोऽवदल्लज्जितमानसोऽपि
कृतोपकारं बसवं गिरीश-
समप्रभं प्राक्तनपुण्यलब्धं
विनीतवाचा शिवभक्तलुब्धः ॥ ३७ ॥

क्षमस्व मन्त्रीश ! ममापराधं
त्वयि प्रशान्ते ननु निस्पृहेऽपि ।
यतोऽ प्रसन्नः पिशुनापवादात्
नृपोऽपि शम्भुप्रिय ! तेऽद्य दासः ॥ ३८ ॥

तथेति मन्त्रीशपदं नृपाल-
विनीतवाक्तुष्टमनाः मनस्वी ।
सनाथमन्यादृशमेव कृत्वा
सन्तोषयामास नृपं यमीन्द्रः ॥ ३९ ॥

निशम्य सिद्धिं बसवप्रभोस्तां
भूयो नृशंसा विगतप्रभावाः ।
स्वनाशभीत्या भवरोगिणस्ते
स्थिताः क्षणं स्थाणुसमानकायाः ॥ ४० ॥

(शार्दूलविक्रीडितवृत्तम्)

ये वात्यन्तविरोधिनः शिवमतस्याराधकानां क्षितौ
ये वा बिज्जलभूपतेरनुनये मग्नाः शिवद्रोहिणः ।
सर्वे ते गिरिशप्रभाविबसवस्याग्रे प्रभावर्जिताः
एवं श्रीशरणव्रजस्य महती सर्वोन्नतिः स्थापिता ॥ ४१ ॥

इति शिवकवि डॉ. परड्डी मल्लिकार्जुन विरचिते
बसवभास्करोदये महाकाव्ये बसवलीलाविलासो
नाम पंचदशः सर्गः ।

षोडशः सर्गः

(मन्दाक्रान्तावृत्तम्)

सर्वे शम्भोः परमशरणाः पावनाः साधनोग्राः
स्वे स्वे कर्मण्यभिरतमनःशम्भुयोगप्रवीणा ।
लिंगार्चायां प्रणवसहितं ये रताः साधुवृत्ताः
पंचाचारप्रबलमतयो वीरशैवाः समस्ताः ॥ १ ॥

तत्रामात्ये परमकरुणासागरे लोकमान्ये
लोकेशं तं गिरिशममलं लिंगरूपं भजन्तम् ।
कर्मालिप्ताः भुवनविदिताः प्राप्तशम्भुप्रसादाः
वर्णाचारैर्विषमफलदैः शम्भुभक्ताः विमुक्ताः ॥ २ ॥

शैवाचारैर्विमलमतयो लिंगलीनात्मचित्ताः
निश्चिन्ता ये परमकरुणासागराः लोकवित्ते ।
यद्यज्ज्ञातं शिवमतनुतं श्रीशिवानन्दलीलं
तच्चाचारे सपदि ननु ते नेतुमुद्योगशीलाः ॥ ३ ॥

सद्भक्त्या ये ननु विरहिता ज्ञानशून्याः मनुस्याः
जात्योत्तुंगा अपि कुमतयस्तेऽवराः साधुनिन्द्याः ।
भक्तिज्ञानाचरणसहिता हीनवर्णाः कुलीनाः
वाराणस्यामपि जडधियोऽ ज्ञानिनो भक्तिहीनाः ॥ ४ ॥

सद्भक्तेषु प्रथमगणनापात्रमासीद् दरिद्रः
जात्या शूद्रो[1] विमलमतिना शम्भुभक्त्या पवित्रः ।
ब्राह्मण्यं वै स्मृतिमतमहो त्यक्तवान्यः[2] स्वकीयं
दीक्षाशुद्धः शरणगणनापात्रमेकः स्वतन्त्रः ॥ ५ ॥

वर्णभ्रान्त्या विरहितमहो सज्जनानां समाजं
निर्मातुं तद्भुवनविदितं साधुवृत्तं सुभक्ताः ।
ऐच्छन् शम्भुप्रथमशरणादेशतो भक्तिपूतं
पंचाचारप्रणयरसिकं भूमिकैलासभूतम् ॥ ६ ॥

दीक्षाबद्धः शरणविनुतः शूद्रभक्तात्मजश्च
तद्वच्छुद्धा द्विजतनुभवा दीक्षिता भक्तमान्या ।
प्रेमाबद्धौ शिवमतनुते संगतौ तौ विवाहे
शैवी क्रान्तिः प्रथममभवत्सार्थका साधुमान्या ॥ ७ ॥

श्रुत्वोदन्तं पिशुनहृदयं खेदपूर्णं सरोषं
पादाघातादिव फणधरो दष्टुकामं तदासीत् ।
राजानं तं विवशमकरोद् दण्डितुं तौ सुभक्तौ
यत्राज्ञानं भवति शरणं तत्र का क्रान्तिवार्ता ॥ ८ ॥

---

1) हरलय्यनामाशिवभक्तः ।

2) मधुवरसनामा शरणः ।

तेषां वाचं दुरितमनसां दर्पपूर्णां निशम्य
स्मृत्याधारामिति नृपतिना दुष्टचित्तैकमान्याम् ।
दण्ड्यावेताविति निगदितं चेतसा दुःखितेन
प्राज्ञोऽप्येवं भवति भुवने दृष्टिदोषप्रमादी ॥ ९ ॥

बद्ध्वा वीथ्यां करिचरणयोर्नीयमानौ सवेगं
क्रन्दत्येवं शरणनिवहे मारितौ शम्भुभक्तौ ।
एतद् द्रष्टुं भवति विकलश्चाक्षमः साधुवृन्दः
हर्षोत्फुल्लं भवति हृदयं दुर्जनस्याप्रबुद्धम् ॥ १० ॥

वार्तामेनां शरणमुखतः शम्भुभक्तो निशम्य
आत्मानं हा बसवसचिवो मन्यते सापराधम् ।
न स्थातव्यं शरणमरणानन्तरं पत्तनेऽस्मिन्
गन्तव्यंभो मरणशरणेनादिभक्तेन शम्भोः ॥ ११ ॥

निश्चित्यैवं बसवशरणः संगमेशप्रदेशं
गन्तुं पत्नीं नृपतिभगिनीं नीलनेत्रां[1] द्वितीयाम् ।
तत्रागन्तुं दिशति तरसा लिंगलीनत्वहेतोः
श्रुत्वा रामा हसति वचनं बालिशं कातरस्य ॥ १२ ॥

सर्वव्यापी गिरितनुभवाप्राणनाथो यदि स्यात्
लिंगैक्यं मे भवतु नगरे कानने पर्वते वा ।
गन्तव्यं ते सपदि यदि मे सद्गुरो प्राणनाथ
एतद्धत्याविकलमनसा गम्यतां स्थीयतां वा ॥ १३ ॥

---

1) नीललोचनेति बिज्जलभगिनी बसवद्वितीयभार्या ।

(अनुष्टुभ्)

सर्वत्र सर्वदा शम्भुदर्शनं कुर्वता त्वया ।
सर्वगत्वं महेशस्य विस्मृतं कथमीदृशम् ॥ १४ ॥

कूडले संगमक्षेत्रे वसत्येव यदा शिवः ।
सर्वंगत्वच्युतिस्तस्य भवत्येव न संशयः ॥ १५ ॥

अज्ञानतिमिरार्कोऽपि त्वमेव यदि मुह्यसि ।
लोकध्वान्वविनाशाय कः क्षमो भुवनत्रये ॥ १६ ॥

सर्वधर्मान् परित्यज्य त्वामेव शरणं गता ।
प्राज्ञोऽपि मूढवद् यावद् वर्तसेऽहं हतप्रभा ॥ १७ ॥

(द्रुतविलम्बितवृत्तम्)

शरणमृत्युजदुःखनिवारणं
जगति कुत्र लभेयमिति ब्रुवन् ।
परमसद्गुरुवास/सुपेत्य तं
परमशान्तिरभूद् बसवप्रभुः ॥ १८ ॥

(उपेन्द्रवज्रावृत्तम्)

शिवाविभक्तो बसवेश्वराख्यः
विहाय कायं निजलिंगलीनः ।
जगत्यभूदस्तमयः शिवांशः
तमोऽभिभूतं पुनरेव विश्वम् ॥ १९ ॥

रवेरभावाच्च तमोनिमग्नाः
गिरीशभक्ता इतरेऽप्यनाथाः ।
दिशासु सर्वासु गताः निराशाः
हतप्रभा नेतरि लिंगलीने ॥ २० ॥

वृथेशभक्तेषु हतेषु रोषात्
क्वचिद् गणाचारवतां समूहः ।
नृपं शिवाराधकबाधकं तं
जघान पैशुन्यवतामधीनम् ॥ २१ ॥

विरागिणां हन्त शमप्रियाणां
मनो भृशं दुर्जनताडितं चेत् ।
जगद्विनाशाय कृतप्रयत्ना
भवन्ति शम्भो शरणाः प्रशान्ताः ॥ २२ ॥

अभूतपूर्वे जगदेकरत्ने
विमुक्तकाये करुणालयेऽस्मिन् ।
प्रचण्डभानौ बसवेश्वराख्ये
गतप्रभं विश्वमिदं समस्तम् ॥ २३ ॥

शिवप्रबोधो नितरामनाथः
शिवव्रतं हन्त निरस्तधैर्यम् ।
गिरीशभक्तिर्भुवने विलुप्ता
तिरोहिते तद्बसवेशभानौ ॥ २४ ॥

(वसन्ततिलकवृत्तम्)

शैवागमोदितसदाचारणप्रतिष्ठा
बेधामृतादृतसुभक्तिरतीतमाया ।
लोकोपकारनिरता बसवेश्वरस्य
काचित्कदाचिदपि भौतिककायपूर्णा ॥ २५ ॥

इति शिवकवि डॉ. परड्डी मल्लिकार्जुन विरचिते
बसव भास्करोदये महाकाव्ये भास्करास्तो
नाम षोडशः सर्गः ।

समाप्तं चेदं महाकाव्यम्

वीरशैव परिभाषिक पदकोशः

1 वीरशैवपदनिर्वचनम्-

(शक्ति विशिष्टाद्वैतदर्शनम्)

विशब्देनोच्यते विद्या शिवजीवैक्यबोधिनी ।

तस्यां रमन्ते ये शैवा वीरशैवास्तु ते मताः ॥

(सिद्धान्तशिखामणि - ५२५)

2 वीरशैवलक्षणम्-

विभूतिर्यस्य भालेऽस्ति कण्ठे लिंगं मदात्मकम् ।

रुद्राक्षधारणं देहे सोऽहं देवि न संशयः ॥

(पारमेश्वरागम)

3 शाम्भवव्रतमेतत्-

श्रीलिंगभस्मरुद्राक्षधारणात्मकमुत्तमम् ।

शाम्भवव्रतमेतद्धि वेदशास्त्रैकचोदितम् ॥

(चन्द्रज्ञानागमः)

यो हस्तपीठे निजलिंगमिष्टं विन्यस्य तल्लीनमनःप्रवृत्तिः ।

बाह्यक्रियासंकुलनिस्पृहात्मा संपूजयत्यंग स वीरशैवः ॥

(शंकरसंहिता)

4 स्थलम्–

यत्रादौ स्थीयते विश्वं प्राकृतं पौरुषं तथा ।
लीयते पुनरन्ते च स्थलं तत्प्रोच्यते तथा ।।
(अनुभवसूत्र II ५)

5 स्थलद्वैविध्यम्–

उपास्योपासकत्वेन स्थलमेव द्विधा भवेत्

अ) लिंगम्– लीयते गम्यते यत्र येन सर्वं चराचरम् ।
तदेतल्लिंगमित्युक्तं लिंगतत्त्वपरायणैः ।।

आ) अंगम्– अमिति ब्रह्म सन्मात्रं गच्छतीति गमुच्यते ।
रूप्यतेऽङ्गमिति प्राज्ञैरंगतत्त्वविचिन्तकैः ।।
(अनुभवसूत्रं)

6 दीक्षा–

दीयते लिंगसम्बन्धः क्षीयते च मलत्रयम् ।
दीयते क्षीयते यस्मास्सा दीक्षेति निगद्यते ।।(कारणागम)

7 दीक्षात्रयम्–

क्रियादीक्षा मन्त्रदीक्षा वेधादीक्षा ।

8 मलत्रयम्–

आणवमलं कार्मिकमलं मायामलम् ।

9 शरीरत्रयम्–

स्थूलं सूक्ष्मं कारणम् ।

10 लिंगगतषड्विधशक्तिः–

क्रिया, ज्ञान, इच्छा, आदि, परा, चित्

(प्रवृत्तिपरा)

11 अंगगत षड्विध भक्तिः–

श्रद्धा, निष्ठा, अवधान, अनुभाव, आनन्द, समरस ।

(निवृत्तिपरा)

12 भक्तिपारम्यम्–

धर्मादिपुरुषार्थानां चतुर्णां परतः परा ।

पंचमः पुरुषार्थो हि भक्तिः शैवी सनातनी ॥

(अनुभवसूत्रम्)

13 अष्टावरणानि–

गुरुर्लिगं, जंगमः, पादोदक, प्रसाद, विभूति, रुद्राक्षं,

मन्त्रः ।

14 पंचाचारा–

शिवाचारः, लिंगाचारः, सदाचारः, गणाचारः,

भृत्याचारः ।

15 षट्स्थलानि–

भक्त, माहेश्वर, प्रसादि, प्राणलिंगि, शरण, ऐक्य ।

16 एकोत्तरशतस्थलानि–

४४ अंगस्थलानि, ५७ लिंगस्थलानि

(पिंडादिज्ञानशून्यान्तानि)

17 षड्लिंगानि–

आचार, गुरु, शिव, जंगम प्रसाद, महालिंग ।

18 अंगत्रयम्–

त्यागांग, भोगांग, योगांग ।

19 शिवागमा–

कामिकाद्या वातुलांताः शिवेनोक्ताः शिवागमाः ।

(अष्टविंशतिसंख्यकाः)

20 पंचाक्षरीमन्त्रः– नमः शिवाय ।

षडक्षरीमन्त्रः– ॐ नमः शिवाय ।

सप्तकोटिषु मन्त्रेषु मन्त्रः पंचाक्षरो महान् ।

ब्रह्मविष्णवादिदेवेषु यथा शम्भुर्महत्तरः ॥

(सिद्धान्तशिखामणि)

21 मोक्षः– लिंगांगसामरस्यम्, शिवयोगः ।

श्लोकानुक्रमणी

अंके स्वमातुः 4-9
अक्केत्यादर 14-13
अग्रणी बलशालिनां 5-24
अर्घ्यंपाद्य 5-34
अज्ञानतिमिरार्कोऽपि 16-16
अतृप्ता धनसंपत्त्या 9-34
अदिरामुमा 5-9
अध्यक्षः शरणा 14-11
अन्ययोषिद्वणो 2-31
अन्यायोनार्जितं 9-45
अभूतपूर्वे 15-23
अभूतपूर्वं 10-25
अमरेशांक 14-18
अमात्यमुख्यो 15-20
अम्भोधि गर्भ 14-12
अयोनिजोगर्भ 4-6
अयं न दस्युः 15-13
अल्पे वयस्यतुल 13-28
अल्लमप्रभुदेवेन 14-17
अष्टावरणसंपन्नो 6-35
असामर्थ्यमेषां 8-7
अस्मिन् प्रवित्र 1-48
अहं प्रभोरल्लम 15-24
आक्रन्दनं जगति 4-20
आगता दूरतो 2-9
आगते बसवे 7-21
आगतं बसवं 6-8
आगतं शिवधर्मं 5-2
आनन्दाश्चर्य 6-11
आनन्दं शिव 3-3
आत्मवत्पश्य 6-47
आत्मशक्तियुतः 5-25
इति सदाशिव 9-51
इत्थ नवे बयसि 13-13
इत्थं निशान्त 1-50
इत्थं पुराणसमये 2-40
इत्थं लौकिक 14-35
इत्थं वदन् 4-48
इत्थं विनिश्चित्य 4-51
इमां प्रतिज्ञां 15-6
इष्टलिंगाख्य 6-27
इष्टलिंगादि 9-47
इहासंख्या 12-16
ईशनिर्मिति 2-23
ईशावास्यमिदं 9-29
उक्तं तदा 4-50

उवाच चैनं	15-33	कूडले संगम	15-15
उवाच प्रभुं	8-9	कोकिला हर्षपूर्णाः	2-38
एकाकिनी	14-20	कोऽपि वा	7-14
एकं च सद्	1-18	क्रियापवर्गं	15-29
एकः धर्मैक	1-33	क्रियामग्न	8-29
एतावदेव	4-30	क्रीडापि सैकत	13-11
एतत्पुराण	3-19	क्षमस्व मन्त्रीश	15-38
एवं विचिन्त्य	6-20	क्षेत्रकार्यादि	2-28
एवमुक्तवति	7-15	क्षेत्रादिकार्यं	1-14
ऐश्वर्यदोऽपि	1-27	खेदालस्यभरा	3-29
कथं प्रीतिपात्रं	12-55	गणाचारबन्धुः	8-38
कदाचित्सभायां	8-5	गतो विभ्रमो	12-31
कराग्रसंस्पर्शन	15-11	गंगया निज	7-12
कर्णाटरम्य	3-1	गंगाधरान्तर	13-5
कर्मकाण्ड	7-8	गंगाम्बिका	5-40
कर्मप्रवृत्त	1-15	गर्भालसापि	3-27
कल्पवृक्ष	9-20	गर्भोदये	3-18
कार्यस्वभाव	1-13	गर्भस्थितिश्च	3-17
कामधेनु	10-15	गर्भस्थे निज	11-2
कामातुरो	13-16	गायने नर्तने	2-6
कामिनीकटाक्ष	10-9	गिरीशप्रभावं	8-1
कामोपभोग	1-12	गिरीशानुकारी	12-4
कार्यं हि	13-23	गिरेः सानु	12-15
कारुण्यं	11-17	गुरुलिंगचराणां	9-38
कालिदासा	2-20	गुरुलिंगचरानीश	6-29
कुतो दुर्जनानां	8-2	गुरुलिंगचरेष्वेक	9-30

गुरो:शिवज्ञान	15-26	तत्सूचयत्य	1-17
गृहाण राजेन्द्र	15-36	तथाच कल्याण	15-22
गृहे स्वयं	15-8	तथापि लोक	4-8
चकोरश्चन्द्रिकापान	9-35	तथेति मन्त्रीश	15-39
चंचलेन्द्रिय	5-13	तदानीं नरेशो	7-25
चन्द्रदर्शन	7-22	तदा बिज्जलो	8-12
चन्द्रबिम्ब	7-6	तदामात्य	8-18
चन्द्रेऽनन्यतया	14-16	तदा सिद्धरामो	12-37
चराचितनिज	9-2	तदीयमाक्रन्दन	15-12
चातको रमते	5-15	तदीयामुदारां	12-3
चातुर्यं चरसेवने	11-19	तदुभय	12-39
जंगमार्चन	9-39	तदेद्वीर	6-39
जात: कुले	4-20	तद् गृहाण	7-18
जातवेदमुनि:	6-15	तद्वचो	5-6
जातिलिंगादि	15-22	तद्वचोवारि	9-18
जानन् सर्वमिदं	6-14	तन्द्रिका	9-44
जितक्रोधरय:	6-51	तवानन्यभक्त्या	12-22
जित्वाखिलं	1-41	तस्मिन् धार्मिक	11-22
जीवेशभेदगणना	4-40	तस्मिन् प्रसन्न	3-16
ज्योतिष्यशास्त्र	3-4	तस्य स्वबान्धव	13-25
ता एव पादय	6-5	तं समीक्ष्य	5-11
ततो भूपदत्तां	8-21	तीर्थप्रवास	3-5
तत्तीक्ष्णयन्त्र	4-32	तुङ्गभद्रा	2-13
तत्प्रतीकमेक	10-2	तेनाचार्यं	11-21
तत्र बिज्जल	7-13	तेषां वाचं	16-9
तत्रामात्ये	16-2	तेषु स्वतन्त्र	13-6

तोषमेति 5-37
तौ दम्पती परम 3-13
तौ दम्पती सुरत 3-3
तं विलोक्य 10-14
त्वं स्वयं 10-4
त्रिविधेन 9-46
त्यक्तदाराः 9-14
त्यक्तपूर्वाश्रम 9-10
त्यक्तवैदिक 5-1
त्यक्त्वा व्रतं 3-11
त्वत्कर्मकाण्ड 4-17
त्वत्प्रीति 4-29
त्वदागमन 6-22
त्वदादेशमग्नः 12-33
त्वदायत्त 8-17
दर्शनं नाव 2-4
दर्शनं वीरशैवाख्य 14 33
दारिद्र्यदुःख 6-44
दासीव सापि 13-2
दासीसुतो 14-24
दिगन्तरायात 15-18
दीक्षाबद्ध 16-7
दुर्गमे गिरि 12-12
दुर्गमे शिखरे 12-10
दृढव्यथो 5-4
दृष्ट्वा तद् 6-4
देवालये 1-26
देशभाषा 6-3
दैन्यदुःख 12-13
दैवाच्च वैदिक 4-38
दैवदत्तमिदं 5-22
धनाधिक्यसौख्य 8-44
धन्यतां बलदेव 5-39
धरावतीर्णं 9-3
धर्मार्थकाम 5-42
धर्मोपजीवि 1-23
धूर्तोपकार 4-44
धेनुवत्सा 4-9
न कोऽपि प्रमादाद् 8-25
नक्तं प्रभात 3-14
नग्नं कलेवर 13-22
न तत्र कश्चित् 15-19
न तें जाति 8-46
नन्दीशमंदिर 3-15
नन्दीश्वरः 3-12
न भूतं न भाव्यं 8-42
नमन्तमुन्नाताचारं 6 21
न मे त्वदीये 15-35
न मे शम्भुभक्तं 8-24
नर्तनं विपिने 5-21
न वर्णादि 8-45
नागाम्बा 11-1

नानादेशसमायाते	9-1	परदारेषु कर्तव्या	4-48
नानाविधार्चन	4-25	परद्रव्यं सुलभ्यं	4-50
नानाविधैश्च	3-9	परित्यक्तधना	9-13
नानास्वभाव	6-24	परित्यजन्	4-11
नारीगणस्य	1-29	परिष्कृत्य	6-20
नार्या भवेत्	13-14	परीक्ष्यं स्वयं	8-10
निन्द्यं शरीर	13-19	पशूनां पतित्वं	12-3
निमन्त्रणादायात	15-25	पादतीर्थं	14-29
निर्ममत्व	10-6	पापिनो	6-46
निशम्य सिद्धि	15-40	पारलौकिक	6-41
निश्चित्यैवं	15-12	पाषाणोदर	14-14
नृपाणां धनिनां	9-7	पिता पुनीतो	3-31
नृपोऽवदल्ल	15-37	पितुर्वच	4-15
नृपस्य कोश	15-30	पीत्वा सुरां	1-36
नृशसंकर्णेजप	15-31	पुंवत्स्त्रीयोऽपि	1-10
नैकदेशसमायात	9-6	पुनरागत्य	6-7
नैवान्यस्य	9-23	पुत्रः पितुर्वचन	4-21
पट्टणं नृप	5-29	पुत्रोत्सवो	4-1
पतिः पशूना	4-13	पुत्रोदयं	3-10
पत्युः प्रेम	3-28	पुरातनानां	15-3
पंचाक्षरजप	9-34	पुरारिभक्ता	15-1
पंचाक्षरी	3-24	पुष्पवृष्टिर	5-38
पंचाचार	11-20	पूजनं विधाय	10-16
परतापाप	9-26	पूतं यथा	13-8
परदैवनिरासक्ता	10-27	प्रजानां	8-23
परस्त्रीगणो	8-30	प्रतिज्ञा	8-40

प्रभुः प्रात	12-36	भक्तिप्रसाद	4-39
प्रभुश्च तेषां	15-5	भक्तिज्ञानपरा	14-1
प्रभोरसंसृष्टि	15-28	भक्तिज्ञानसमा	11-12
प्रस्थितं बलदेव	5-4	भावत्प्रीति	8-13
प्राणिहिंसाऽपि	6-33	भवेद्दरिद्रः	15-34
प्रातरेव	7-2	भवद्भारतीयं	12-32
प्राप्ते यौवन	11-15	भस्मनात्रिपुंड्र	10-8
प्रामाण्यमागमा	6-40	भुक्त्वापि	1-44
बद्ध्वावीथ्यां	15-20	भुवनं भवनं	6-36
बन्धनं परदार	5-14	भुवनवन्दित	12-41
बसवप्रभुसामीप्य	9-19	भूतानुकम्पि	1-39
बसवेश्वरमहा	9-8	भूपतिर्बलदेव	7-16
बसवेशमहामन्त्र	9-32	भूरियं तव	5-10
बसवेशं	11-16	भोगापवर्गफलदं	4-4
बसवेशकृतादेश	11-24	भोगापवर्गसुगमा	4-27
बसवेशप्रभुप्रोक्तं	9-50	भ्रष्टोऽधिकार	1-34
बसवेशमुमा	10-5	मक्षिकावधु	5-12
बहिर्गृहाद्	15-10	मग्नं तमस्य	1-47
बहुद्रव्य	11-32	मङ्गलोत्तम	5-35
बाल्यात्प्रभृ	13-20	मण्डिते विविध	5-3
बाल्ये यतः	13-9	मन्त्रिपुङ्ग	5-17
बिज्जलो	7-24	मन्त्रीशोऽपि	11-10
बिल्हणो यत्र	2-37	मत्सुता	5-7
बुभुक्षापीडिता	9-21	मन्दमारुत	5-20
ब्रह्मचर्याश्रितं	2-32	मया च प्रजाना	8-14
भक्तवत्सल	12-9	मल्लिकार्जुन	12-6

मातुलो बलदेव	5-3	यत्कृपार्व	10-3
मातुलो बसवेशो	11-25	यत्तु भाविनि	7-11
मातृवत्पर	9-17	यत्र कन्याकुमारी	2-17
मादाम्बया	3-2	यत्र कर्णाटदेशो	2-23
मार्गमध्यविराम	5-19	यत्र कार्यंक्षमो	2-36
मुग्धं जनं	1-38	यत्र कृष्ण:	2-33
मृत्युंजयातुल	1-4	यत्र कृष्णादि	2-12
मूर्ख:कुलीन	1-30	यत्र कोणार्क	2-16
मूर्तिमान्	10-13	यत्र गार्गीति	2-22
मूलं वृक्षमुखं	9-48	यत्र चार्वाक	2-5
मृत्योरनन्तर	4-35	यत्र धर्मे	2-3
मेनात्मजा	13-12	यत्र धूर्तो	2-35
मोक्षस्य	6-38	यत्र नानाविधा	2-25
यक्षराक्षस	5-28	यत्र नैकेषु	2-30
यतीनां वरेण्या	8-43	यत्र भागीरथी	2-7
य: काकनीड	4-37	यत्र भार्याविचो	2-34
य: पौराणिक	11-13	यत्र वाराणसी	2-18
य: प्रसिद्ध	10-12	यत्र शैलाधिवास	2-19
य: शिवंसदा	10-10	यत्र सर्वे स्वयं	2-26
य: स्वयं गिरिजा	12-11	यत्र सिन्धूनदी	2-8
य: स्वयं शिवागम	10-7	यत्रासौ	14-2
यच्चन्द्रास्य	11-4	यत्संतति	1-7
यतो जंगमानां	8-37	यथा कामधेनु	8-16
यतो दृष्टिपात:	12-25	यथा दृक्पातधन्या	9-16
यतो नाथराज	12-28	यथा देवमध्ये	8-15
यतो लिंगधारी	8-20	यथाऽलक्ष्य	8-39

यथासिन्धु	8–19	यस्या वपु	13–10
यदा गर्तभेदः	8–11	यस्योदात्त	11–9
यदा गुरुः	4–5	यावत्क्रीडति	11–7
यदा पतिः पन्नग	15–15	यावद्रोदिति	11–6
यदात्मदीये	4–16	यावद्विवेक	3–4
यदा सिद्धरामो	12–20	यासूतकादि	13–13
यदा स्मरत्यात्म	4–7	या स्त्री पुरा	1–45
यद्गर्भवास	3–23	ये चाप्रि	6–43
यद्गिरेः	12–8	येनासौ	14–5
यद् भक्तिभाव	4 33	येऽपि तत्र	9–22
यद् भक्तिरोश	3–26	योपूर्वं	6–13
यद्विप्रवंश	4–22	यो मूषकादि	1–28
यद्विलोभनार्थं	10–5	योऽल्लम	10–17
यद्वेदशास्त्र	4–23	योवात्यन्त	15–41
यन्नगाधिपतिः	5–33	ये वा पावन	14–9
यत्पुर	5–36	ये वाश्रमैक	1–22
यद् हिमाद्रि	2–14	येषां कणप	14–4
यस्मिन्मते पशु	4–46	येषां कृते	1-24
यस्मिन्मते तरु	4-43	येषांमक्रम	14-3
यस्मिन् शिवस्तनु	4–45	येषामागम	14–6
यस्य कस्य	5–26	येषां तृप्तं	9–40
यस्य दर्शनं	10–22	येषां प्रजाहित	1–40
यस्य भालं च	14–27	येषां बहुविध	9–41
यस्य वै शिव	5–27	येषां वाङ्मृदुता	14–8
यस्य संतुष्ट	9–42	येषां श्रमेण	1–37
यस्याखिलं	9–12	ये साधुयोगि	3–6

योगाङ्ग 13–24
योऽभव 9–15
यो वा चन्द्र 11–5
यो वा दर्शन 11-14
यो वा पश्यति 11–8
यो हठक्रिया 10–21
रवेरभावात् 15–20
राजते गृहे 5–31
राजापि कौशिक 13-17
लब्धोदया 13–4
लिपिज्ञैः समस्तैः 8-6
लिंगदीक्षा 14-23
लिंगनिष्ठः 14–28
लिंगलीन 10-11
लिंगैकनिष्ठः 13–21
लोकवृत्त 7–7
लोकाभिराम 3–8
लोकाराधन 11–23
लोके स्वयं 3–7
वचा तेन तुष्टो 8–20
वचा तेन तुष्टः 12–23
वन्दिमागधगीत 7–20
वन्दे जगत्त्रय 1–2
वन्देऽथणी 1–3
वन्दे प्रसन्नवदनं 1–1
वर्गतो वेषतो 2–2
वर्णपाश 7–10
वर्गभ्रान्त्या 16-6
वर्णलिंगादि 14–31
वर्णादिदूषित 1–11
वर्णाश्रमादिनि 13–1
वर्णाश्रमादिविषये 4–18
वर्णोद्योग 12–10
वस्त्रं विहाय 13–18
वाचा स्वकीय 13–15
वार्तमिनां 15–11
वापीकूप 6–6
वार्धके यत्न 2–29
वार्धक्यदोष 1–31
वाल्मीकिमुख्या 1–6
विचारमग्ना 4–12
विचिन्वतातेन 15-9
वित्तहीना नरा 2–10
विद्यासागर 6–5
विरागिणां 15–12
विवाहदीक्षितो 6–23
विविध देवता 6–49
विश्वसृष्टि 12–7
वीरशैवमता 7–23
वृथशभक्तेषु 15–21
वृद्धत्वं जरसा 14-7
वेदः प्रमाण 4–28

वेदादिपूर्वं 1–20
वेदादिशास्त्र 4–24
वेदान्तोदितवीर 11–18
वेदान्तोदितसत्पु 11–11
वेदवेदान्त 2–21
वेदादिभिन्न 1–8
वैराग्यामर 13–30
वैष्णवैः 2–1
शंकराचार्यं 2–11
शक्तेषु चोर 1–35
शम्भुभक्तधुरन्दरं 7–19
शम्भुभक्तिरमन्द 5–5
शम्भुभक्तिसागर 10–20
शरणमृत्युज 15–18
शशिनो गगना 9–36
शान्तस्वभाव 1–9
शापादिदक्ष 1–25
शास्त्रोक्तरीत्या 4–3
शिलामयं 15–17
शिवकलामग्र 12–40
शिवं शैलवासं 12–14
शिवप्रबोधो 15–24
शिवः प्रार्थनीयो 8–36
शिवः शक्तियुक्तः 8–34
शिवदीक्षा 6–31
शिवद्रोहिणस्ते 8–33
शिवन्यस्तचित्त 8–4
शिवभक्त्यमलेन 6–28
शिवमुखं 9–19
शिवादिभक्तो 15–19
शिवस्यादिभक्तं 8–47
शिवागमादि 6–25
शिवाचार 8–31
शिवाधिक्यमुक्त्वा 8–22
शिवाधिक्यविसंवादे 9–31
शिवानन्दतृप्तो 12-1
शिवानुभावैकनिज 15–4
शिवानुभावैकरुचि 15–2
शिवेनैव साकं 12–19
शिवाशीर्वलेन 12–26
शिवे भक्ति 8–32
शुद्धमुक्तामयं 2–27
शुभ्रवस्त्रधर 7–4
शून्यसिंहास 10–24
शौर्यगाम्भीर्यं 2–39
शैवागमादि 1–49
शैवागमोदित 15–25
शैवागमोक्त 4-34
शैवाचारैर्विमल 16–3
श्रीकालिदास 1–5
श्रीमादिराज 3–25
श्रीमादिराजसुत 4-2

श्री जातवेदमुनि 4–49
श्री विभूति 7–3
श्री शंकरो 5–47
श्री शम्भुभक्ति 13–7
श्री शम्भुलिंग 4–36
श्री शाम्भवं 4–31
श्री शिवागम 7–1
श्रीशैलरम्य 13–27
श्रुत्वा वचस्तस्य 4–19
श्रुत्वोदन्तं 16–8
षट्स्थलज्ञान 14–30
षट्स्थलाचार 9–33
षट्स्थलेष्वनेक 10–1
संगमेशानुकम्पा 14–20
संगमो युवयो 5–8
संपद्भूरोऽपि 1–46
संभाव्य तरु 6–12
संयोगं 9–12
स केवलं 14–26
सगर्वं 12–27
सचाष्टवर्षीय 4–14
सचिन्ता सबाधे 8–8
सज्जमो 5–18
स तत्र 12–17
स तस्करो 15–16
सत्कार्यनिरता 6–34
सत्क्रियावर्जितं 14–21
सत्यशुद्धक्रियाशक्ति 6–30
सत्यशुद्धक्रियाशक्ति 9–24
सत्वशुद्धक्रियासक्त 14–19
सत्वं मदीय 4–26
सदाचारजगद् 9–28
सदाध्ययन 6–24
सदालोककीर्ते 12–34
सदाव्यक्तरूप 8–28
सदैन्यं 12–18
सदैव हि 6–19
सद्गर्भोदय 11–3
सद्गुणग्राम 6–45
सद्गुरोः 7–9
सद्वितीय 7–5
सद्भक्त्या ये 16–4
सद्भक्तेषु 16–5
सप्तकोटिमहा 9–37
स बालोऽपि 12–5
समक्षमेतस्य 15–32
समाजक्रियायां 12–24
समाप्तेऽथ 6–1
समायातं 6–18
समीक्ष्यात्म 12–21
सर्वंगत्वान्महे 9–11
सर्वतो बोध 14–32

सर्वत्र सर्वदा	15-14	सोवरीसहितः	6-2
सर्वधर्मान्	16-17	सोमनाथ	2-15
सर्वव्यापी	15-13	सौभाग्यं बसवादि	11-16
सर्वेतराबुपल	1-19	स्वकर्म निरता	9-25
सर्वे शम्भोः	16-1	स्वकिंकरानीत	15-27
सर्वेषां यदि	6-37	स्वकीयवित्तं	15-14
सर्वेषां शिवभक्ति	14-15	स्वगुरुसन्निधि	12-38
सर्वो गुण	1-32	स्वधर्मनिष्ठा	15-21
सर्वोदयविचारो	9-9	स्वधर्मेच	8-35
सर्वोदयं प्रति	4-42	स्वपत्नीपितुर्यत्	8-3
स वीरव्रती सन्	8-41	स्वागतं च	10-18
सहपाठिगणः	6-10	स्वागतं प्रभु	7-17
साक्षराः काव्य	2-24	स्वास्थ्यमण्डलोग्र	10-19
साध्वी स्वकीय	3-22	स्वेच्छयात्र	10-3
साम्यवादे रताः	14-25	हत्वाहवे	1-43
साऽलौकिकी	13-29	हरिर्वा	8-27
साहित्यसंगीत	4-9	हर्षपूर्णमना	5-16
सिन्धवः सागरं	14-34	हर्षपूर्णमनास्तदा	5-32
सुभक्तमाख्य	15-23	हसन्नेव	12-29
सुवर्णकांक्षा	15-7	ज्ञानवान्	6-17
सूचिभेद्यन्ध	1-51		

शुद्धिपत्रम्

पृष्टसंख्या	पङ्क्तसंख्या	अशुद्ध	शुद्ध
2	12	परित्र	पवित्र
4	7	स्वरुप	स्वरूप
6	21	स्व हते	स्वहिते
11	10	जहुकन्या	जह्नुकन्या
12	9	तुगङ्भद्रा	तुङ्गभद्रा
13	9	शैलदिवासः	शैलाधिवासः
13	20	मूतले	भूतले
22	7	शुशोदय	शुभोदय
22	16	सयाधिः	समाधिः
23	19	खदालस्यभवा	खेदालस्यभरा
30	20	त्वहृष्टि	त्वद्दृष्टि
32	19	वृतमा	व्रतमा
37	1	गम्बाम्बिका	गङ्गाम्बिका
39	5	गनोहर	मनोहर
39	20	स्छायया	श्छायया

40	4	सुखवधनं	सुखसाधनं
51	16	भाषिणो	भाषणो
52	13	भावनायापि	भावनयापि
61	12	शिवान्दकोशः	शिवानन्दकोशः
64	9	गुरोर्या	गुरोर्वा
77	21	शासन	शासनं च ।
79	7	नितामोद	जनितामदि
88	11	संचारन्तः	संचरन्तः
92	9	बहिरत्तस्य	बहिस्तख्य
98	6	स्वह	सह
98	14	लोभा	लोभ
100	14	मेससहृशं	मेरुसदृशं
105	9	ज्योस्त्ना	ज्योत्स्ना
115	6	गिरीश	गिरिश
122	7	ध्बान्व	ध्वान्त
122	13	वासामु	वास
124	3	बेधामृता	बोधामृता